


# Bhakti Maala

Sanskrit

(A collection of chantings)

compiled by

Sastry Sreepada

Hindu Temple Society, Inc
450 Albany Shaker Rd
Loudonville, NY 12211
www.hindutemplealbany.org

# Pooja Chanting Order

| Lakshminarayana Abhishekam |
|---|
| Lakshmi Suprabhatam |
| Venkateswara Suprabhatam |
| Purusa Suktam |
| Narayana Suktam |
| Sri Suktam |
| Durgra Suktam |
| Taittiriya Upanishad |
| Vishnu Sahasranama Stotram/ Lakshmi Sahasranama Stotram |
| Sri Lakshmi Astottara Sata Nama Stotram |
| Maha Lakshmi Astaka Stotram |

| Shiva Pooja/Pradosham |
|---|
| Rudra Laghu Nyasam |
| Rudra Namakam |
| Rudra Chamakam |
| Purusha Suktam |
| Narayana Suktam |
| Sri Suktam |
| Durgra Suktam |
| Mantra Pushpam |

| Sankatahara Chaturthi |
|---|
| Ganesh Athavasheersham |
| Rudra Laghu Nyasam |
| Rudra Namakam |
| Purusha Suktam |
| Durga Suktam |

| Krithika Pooja |
|---|
| Rudra Namakam |
| Rudra Laghu Nyasam |
| Rudra Chamakam |
| Purusha Suktam |
| Durga Suktam |

| Ayyappa Pooja |
|---|
| Purusha Suktam |
| Sri Suktam |
| Taittiriya Upanishad |

| Lalitha/Parvathi Pooja |
|---|
| Sri Lalitha Sahasranama Stotram |

# CONTENTS


| | | |
|---|---|---|
| १. | लक्ष्मी सुप्रभातम् | ५ |
| २. | वेंकटेश्वर सुप्रभातम् | १३ |
| ३. | पुरुष सूक्तम् | २९ |
| ४. | नारायण सूक्तम् | ३३ |
| ५. | श्री सूक्तम् | ३५ |
| ६. | दुर्गा सूक्तम् | ३९ |
| ७. | विष्णु सहस्र नाम स्तोत्रम् | ४१ |
| ८. | श्री लक्ष्मी अष्टोत्तर शत नाम स्तोत्रम् | ७० |
| ९. | महा लक्ष्मी अष्टक स्तोत्रम् | ७४ |
| १०. | लक्ष्मी सहस्रनाम स्तोत्रम् | ७६ |
| ११. | रुद्र लघुन्यासम् | १०५ |
| १२. | रुद्र नमकम् | ११३ |
| १३. | रुद्र चमकम् | १२४ |
| १४. | शिवपञ्चाक्षर स्तोत्रम् | १३१ |
| १५. | लिन्गाष्ट्कम् | १३२ |
| १६. | शिव अष्टोत्तर शतनामावलि | १३३ |
| १७. | मन्त्र पुष्पम् | १३५ |
| १८. | गणपत्यथर्वशीर्षोपनिषत् | १३८ |
| १९. | दुर्गा सूक्तम् | १४२ |
| २०. | ललिता सहस्र नाम स्तोत्रम् | १४४ |

२१. ललिता अष्टोत्तर शतनामावलि १६३
२२. महिषासुरमर्दिनि स्तोत्रम् १६९
२३. ललिता सहस्र नामावलि १७३
२४. दुर्गा अष्टोत्तर शतनामावलि २२१
२५. लक्ष्मी अष्टोत्तर शत नामावलि २२३
२६. सरस्वती अष्टोत्तर शतनामावलि २२५

श्रीः

# श्री लक्ष्मी सुप्रभातं

श्री महालक्ष्म्यै नमः

श्री महा विष्णवे नमः

श्री महालक्ष्मी सुप्रभात स्तुतिः

विष्णुकान्ते महालक्ष्मी पूर्वा सन्ध्या प्रवर्तते
उत्तिष्ट शेषपर्यङ्कात् कर्तव्यं दैवमाह्निकं  १

उत्तिष्टोत्तिष्ट गोविंद प्रिये जागृहि जागृहि
सिन्धुजे जगदंब त्वं त्रिलोकी मंगळं कुरु  २

जगन्नाथमनःकान्ते जगदंब दयानिधे
पाहिपाहि शुभालोकैस्त्वदपत्यमिदं जगत्  ३

ॐकारक्षेत्रसंभूते मातरोम्कार विग्रहे
ॐकारगर्भगे देवी दयया परयावनः  ४

तवसुप्रभातमयि दुग्धसिन्धुजे
भवतु प्रसन्नवदने दयामयि
द्रुहिणादिदेव वनिताकृतार्हणे
श्रुतिगीयमाना विभवे हरि प्रिये  ५

त्र्यैलोक्यमातरखिलेश्वरि वासुदेव
वक्षोविहार करुणागुणाढ्ये
स्वामिन्युपाश्रित जनेप्सितदानदक्षे

भो लक्ष्मि विष्णुदयिते तव सुप्रभातम् ६

प्राच्यामुदेति सवितार्पित पंकजश्रीः
विप्राविशुद्धतनवो मुदितान्तरंगाः
भक्त्याकृतांजलिपुटास्तव धामयान्ति
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम् ७
कोकाः प्रहृष्टमनस स्ववधूपगूढाः
घूकाविशन्ति धरणीरुहकोटराणि
कुत्राप्यलीयत तमोभिरहो अशेषैः
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम् ८
भाण्दप्रपूर्ण दधिमन्थन संप्रवृत्त
गोपीजनस्य करभूषण नादमिश्रः
गीतध्वनिस्तव यशोभिरयं विभाति
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम् ९
ब्रह्मेशशक्रदयिताः पतिमिस्सहस्वैः
तद्वीक्षणं शुभकरं बत लब्धुकामाः
धामत्वदीयमुपयान्ति सुवस्तुहस्ताः
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम् १०
प्रेमप्रकर्षत इयं परिलीढवत्सा
धेनुस्त्वदीय करुणेक्षणजातपोषा

त्वद्विश्वरूपविधये निहिता पुरस्ताद्

भॊ लक्ष्मि विष्णुदयितॆ तव सुप्रभातम् ११

त्वत्प्रीणनाय ननुहॆषत ऎष वाजी

दन्तावलॊपि परिबृम्हितबृम्हितॊयं

नार्यॊ नराश्च धृतमंगलवस्तुजाताः

भॊ लक्ष्मि विष्णुदयितॆ तव सुप्रभातम् १२

सुप्तॊत्थिता जननि पञ्चरमध्यभाजॊ

लीलाशुकास्स्सपदिभुक्तपयः फलाद्याः

नामानि तॆ परिपठन्तिसुपावनानि

भॊ लक्ष्मि विष्णुदयितॆ तव सुप्रभातम् १३

सत्पुण्यराशिरवनि भारतभूनिवासि

साधुप्रियंकर मनॊहरदिव्यमूर्तॆ

आर्तार्तिहारिणि दयामयिलॊकमातः

भॊ लक्ष्मि विष्णुदयितॆ तव सुप्रभातम् १४

ऎलादिचूर्ण घनसारविमिश्र तीर्थ

संपूर्ण काञ्चनघटान् शिरसा वहन्तः

सन्तॊविशन्ति भवनं तव वाद्य घॊषैः

भॊ लक्ष्मि विष्णुदयितॆ तव सुप्रभातम् १५

क्लुप्ताह्निकाः श्रुतिविदः शुभशील वृत्ताः

शुद्धा इमॆत्रभवतीपरिपूजनाय

त्वत्पादपद्ममुपसेव्य नुवन्ति भक्त्या
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम् १६
इन्द्राग्नि धर्मपतियातुपपाशिवात
यक्षेष भूतपतयोष्टदिशामधीशाः
सेवापरास्तव कृतान्जलयो विभान्ति
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम् १७
ऐते ग्रहा नव रवीन्दुसुतेन्दुभौम
स्वर्भानुकेतु सुरगुर्वसुरार्य मन्दाः
त्वत्किंकरास्तव पदाब्जनिषेवणोक्ताः
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम् १८
मन्दाकिनी जलविहागन पूतदेहाः
सन्ध्यामुपास्य ऋषयो ननुसप्तदिव्यैः
पुष्पैस्त्वदर्हणविधौ त्वरयोपयाताः
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम् १९
वाल्मीकये मुनिवराय निजोपदिष्टं
तत्कान्तमानसवशीकरणप्रवीणं
गायन्नुपैति चरितंतवनारदोय्
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम् २०
स्वर्लोकनिर्वहणकर्मणि यस्य मेधाम्
इन्द्रस्समिच्छति सदा स गुरुः सुराणाम्

धाम्निस्थितः पठतितेद्य दिनस्य शुद्धिम्
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम् २१
त्वद्वेश्मनि प्रियमहोरसि भासमान
सद्रत्नदर्पण समीक्षणकैतवेन
सौभ्रात्रभूमबहुमानितकौस्तुभेम्ब
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम् २२
नानावपूंषि भजतः श्रितरक्षणार्ध
पत्युः प्रियास्तदनुरूप तनूः श्रयन्ति
तद्धर्मसाह्य करणाञ्चरितार्थितस्वै
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम् २३
मानातिलंघि महिमैकनिकेतभूते
दीनार्ति धूनन चणस्व दयेनवद्ये
ॐकारपत्तन सुभाग्य फलायितात्मन्
भो लक्ष्मि विष्णुदयिते तव सुप्रभातम् २४
विश्वं विभाव्य भव सागर मग्नमद्धा
तद्रक्षणे करुणयात्त शुभाष्टमूर्तिम्
ॐकारनामनि पुरे कलिताधिवासाम्
पश्येम भर्तृसहिताम् शरदः शतां त्वाम् २५
महालक्ष्मी सुप्रभत स्तुतिं ये
नराः शुद्धाः प्रत्यहं संपठन्ति

यशस्तेषाम् वाग्मिताम् वांछितं च
    स्वयं लक्ष्मीः सुप्रसन्ना विधेयात्    २६
वेदान्तदेशिक पदांबुज भक्तिभाजा
    श्रीराघवेण कविना सरळेन गीता
श्रीसुप्रभातविषया स्तुतिरच्छभावा
लक्ष्मीं धिनोतु हरिमप्यनघा सदैषा    २७

## श्रीमहालक्ष्मीस्तोत्रम्

अखिलागमसारविदाम् यमिनाम्
    हृदयाब्ज विहार कुतूहलिनी
विनमज्जनताभिमतार्थकरी
    विजयस्व रमे हरिणा सततम्    १
स्वयमान सुरम्य मुखांबुरुहा
    दयमानमनाः प्रणतेष्वनिशम्
प्रणवे नगरे दययोदयिनी
    विजयस्व रमे हरिणा सततं    २
चतुरास्यमुखैरखिलैरमरैः
    कृतनैज महामहिमस्तुतिका
विकचांबुरुहेण सुधामवती

विजयस्व रमे हरिणा सततम्   ३
अतिदुस्सहदुःखकरैरमितै–
दुरितैर्भरितं बहुजन्म कृतैः
परिपालय मां पदयोः पतितं
विजयस्व रमे हरिणा सततम्   ४
सुमुखी शुभदा सुगुणा सुलभा
श्रितसज्जन रक्षण विधिप्रसिता
सुगतिर्निखिलस्य जनस्य मता
विजयस्व रमे हरिणा सततम्   ५
प्रबलारि जिगीषु वलारिमुखैः
हरिसाह्यमुपेत्य पुरामथितात्
अयि दुग्धमयादुदिते जलधेः
विजयस्व रमे हरिणा सततम्   ६
परिपश्यति सर्वसुपर्वगणे
भगवद्भुजमध्य निशान्तगताम्
प्रथिता परमात्म सुलक्ष्मतया
विजयस्व रमे हरिणा सततम्   ७
अवनीतनया त्वमुरीकृतवत्ययि
रामहरेर्दयिता भवती
प्रकटीकुरुते स्म सती सुविधीन्

विजयस्व रमे हरिणा सततम्   ८
विना विष्णुकान्ताम् गतिर्नो गतिर्नो
सदा विष्णुकान्ताम् स्मरेयं स्मरेयम्
रमे विष्णु कान्ते प्रसीद प्रसीद
प्रियं विष्णुकान्ते प्रदेयाः  प्रदेयाः   ९
अहं विष्णु कान्ते त्वदीयांघ्रि पद्मौ
सुदूरादिहागत्य भक्त्या प्रणम्रः
यथानन्दसिन्धौ निमग्न सदास्याम्
तथा मे प्रसीद प्रसीद प्रसीद   १०
अशेषानपि दोषान्मे प्रमादादसकृत्कृतान्
क्षमस्वांब क्षमस्वांब महा लक्ष्मी हरिप्रिये   ११
प्रणत सुरासुर मणिमकुटान्चितकोमल पाद सरोज युगे
भवदवशोषण बहुल भयातुर रक्षण दक्षिण दृक्प्रसरे
परिसर भास्वर निजजनसाधित पावन पूजन हृष्टमनाः
चिरमिदमावस हरिदयिते पुरमोम्पदमिष्टकरी कृपया  १२

# श्री वेंकटेश्वर सुप्रभातं ॥

कौसल्या सुप्रजा राम पूर्वा संध्या प्रवर्तते ।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥ १ ॥

उत्तिष्ठोत्तिष्ठ गोविंद उत्तिष्ठ गरुडध्वज ।
उत्तिष्ठ कमलाकांत त्रैलोक्यं मंगळं कुरु ॥ २ ॥

मातस्समस्तजगतां मधुकैटभारेः
वक्षोविहारिणि मनोहरदिव्यमूर्ते ।
श्रीस्वामिनि श्रितजनप्रियदानशीले
श्रीवेंकटेशदयिते तव सुप्रभातम् ॥ ३ ॥

तव सुप्रभातमरविंदलोचने
भवतु प्रसन्नमुखचंद्रमंडले ।
विधिशंकरेंद्रवनिताभिरर्चिते
वृषशैलनाथदयिते दयानिधे ॥ ४ ॥

अत्र्यादिसप्तऋषयस्समुपास्य संध्यां
आकाशसिंधुकमलानि मनोहराणि ।
आदाय पादयुगमर्चयितुं प्रपन्नाः
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥ ५ ॥

पंचाननाब्जभवषण्मुखवासवाद्याः
त्रैविक्रमादिचरितं विबुधाः स्तुवंति ।
भाषापतिः पठति वासर शुद्धिमारात्
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥ ६ ॥

ईषत्प्रफुल्लसरसीरुहनारिकेळ
पूगद्रुमादिसुमनोहरपालिकानाम् ।
आवाति मंदमनिलस्सह दिव्यगंधैः
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥ ७ ॥

उन्मील्य नेत्रयुगमुत्तम पंजरस्थाः
पात्रावशिष्टकदलीफलपायसानि ।
भुक्त्वा सलीलमथ केलिशुकाः पठंति
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥ ८ ॥

तंत्रीप्रकर्षमधुरस्वनया विपंच्या
गायत्यनंतचरितं तव नारदोऽपि ।
भाषासमग्रमसकृत्करचाररम्यं
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥ ९ ॥

भृंगावळी च मकरंदरसानुविद्ध
झंकारगीत निनदैःसह सेवनाय ।
निर्यात्युपांतसरसीकमलोदरेभ्यः
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥ १० ॥

योषागणेन वरदध्निविमथ्यमाने
घोषालयेषु दधिमंथनतीव्रघोषाः ।
रोषात्कलिं विदधतेककुभश्च कुंभाः
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥ ११ ॥

पद्मेशमित्रशतपत्रगताळिवर्गाः
हर्तुं श्रियं कुवलयस्य निजांगलक्ष्म्या ।
भेरीनिनादमिव बिभ्रति तीव्रनादं
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥ १२ ॥

श्रीमन्नभीष्ट वरदाखिललोकबंधो
श्रीश्रीनिवास जगदेकदयैकसिंधो ।
श्रीदेवतागृहभुजांतर दिव्य मूर्ते
श्रीवेंकटाचलपते तव सुप्रभातम् ॥ १३ ॥

श्रीस्वामिपुष्करिणिकाऽऽप्लवनिर्मलांगाः
श्रेयोऽर्थिनो हरविरिंचसनंदनाद्याः ।
द्वारे वसंति वरवेत्रहतोत्तमांगाः
श्रीवेंकटाचलपते तव सुप्रभातम् ॥ १४ ॥

श्रीशेषशैल गरुडाचल वेंकटाद्रि
नारायणाद्रि वृषभाद्रि वृषाद्रि मुख्याम् ।
आख्यां त्वदीय वसतेरनिशं वदंति
श्रीवेंकटाचलपते तव सुप्रभातम् ॥ १५ ॥

सेवापराः शिवसुरेशकृशानुधर्म–
रक्षोऽंबुनाथ पवमान धनाधिनाथाः ।
बद्धांजलि प्रविलसन्निजशीर्ष देशाः
श्रीवेंकटाचलपते तव सुप्रभातम् ॥ १६ ॥

धाटीषु ते विहगराज मृगाधिराज–
नागाधिराज गजराज हयाधिराजाः ।
स्वस्वाधिकार महिमाधिकमर्थयंते
श्रीवेंकटाचलपते तव सुप्रभातम् ॥ १७ ॥

सूर्येंदु भौम बुध वाक्पति काव्य सौरि–
स्वर्भानु केतु दिविषत्परिषत्प्रधानाः ।
त्वद्दास दास चरमावधि दासदासाः
श्रीवेंकटाचलपते तव सुप्रभातम् ॥ १८ ॥

त्वत्पादधूळि भरितस्फुरितोत्तमांगाः
स्वर्गापवर्ग निरपेक्ष निजांतरंगाः ।
कल्पागमाऽऽकलनयाऽऽकुलतां लभंते
श्रीवेंकटाचलपते तव सुप्रभातम् ॥ १९ ॥

त्वद्गोपुराग्रशिखराणि निरीक्षमाणाः
स्वर्गापवर्गपदवीं परमां श्रयंतः ।
मर्त्या मनुष्यभुवने मतिमाश्रयंते
श्रीवेंकटाचलपते तव सुप्रभातम् ॥ २० ॥

श्रीभूमिनायक दयादिगुणामृताब्धे
देवाधिदेव जगदेकशरण्यमूर्ते ।
श्रीमन्ननंत गरुडादिभिरर्चितांघ्रे
श्रीवेंकटाचलपते तव सुप्रभातम् ॥ २१ ॥

श्रीपद्मनाभ पुरुषोत्तम वासुदेव
वैकुंठ माधव जनार्दन चक्रपाणे ।
श्रीवत्सचिह्न शरणागतपारिजात
श्रीवेंकटाचलपते तव सुप्रभातम् ॥ २२ ॥

कंदर्पदर्प हरसुंदर दिव्यमूर्ते
कांताकुचांबुरुह कुट्मल लोलदृष्टे ।
कळ्याणनिर्मलगुणाकर दिव्यकीर्ते
श्रीवेंकटाचलपते तव सुप्रभातम् ॥ २३ ॥

मीनाकृते कमठ कोल नृसिंह वर्णिन्
स्वामिन् परश्वथतपोधन रामचंद्र ।
शेषांशराम यदुनंदन कल्किरूप
श्रीवेंकटाचलपते तव सुप्रभातम् ॥ २४ ॥

ऐला लवंग घनसार सुगंधि तीर्थं
दिव्यं वियत्सरिति हेमघटेषु पूर्णम् ।
धृत्वाऽऽद्य वैदिक शिखामणयः प्रहृष्टाः
तिष्ठंति वेंकटपते तव सुप्रभातम् ॥ २५ ॥

भास्वानुदेति विकचानि सरोरुहाणि
संपूरयंति निनदैः ककुभो विहंगाः ।
श्रीवैष्णवास्सततमर्थित मंगळास्ते
धामाऽऽश्रयंति तव वेंकट सुप्रभातम् ॥ २६ ॥

ब्रह्मादयः सुरवरास्समहर्षयस्ते
संतस्सनंदन मुखास्त्वथ योगिवर्याः ।
धामांतिके तव हि मंगळवस्तु हस्ताः
श्रीवेंकटाचलपते तव सुप्रभातम् ॥ २७ ॥

लक्ष्मीनिवास निरवद्यगुणैकसिंधो
संसार सागर समुत्तरणैकसेतो ।
वेदांतवेद्यनिजवैभव भक्तभोग्य
श्रीवेंकटाचलपते तव सुप्रभातम् ॥ २८ ॥

इत्थं वृषाचलपतेरिह सुप्रभातम्
ये मानवाः प्रतिदिनं पठितुं प्रवृत्ताः ।
तेषां प्रभातसमये स्मृतिरंगभाजां
प्रज्ञां परार्थसुलभां परमां प्रसूते ॥ २९ ॥

## श्री वेंकटेश्वर स्तोत्रं

कमला कुच चूचुक कुंकुमतो नियतारुणितातुल नीलतनो ।
कमलायतलोचन लोकपते विजयी भव वेंकटशैलपते ॥ १ ॥

सचतुर्मुखषण्मुखपंचमुख प्रमुखाखिलदैवतमौळिमणे ।
शरणागतवत्सल सारनिधे परिपालय मां वृषशैलपते ॥ २ ॥

अतिवेलतया तव दुर्विषहैरनुवेलकृतैरपराधशतैः ।
भरितं त्वरितं वृषशैलपते परया कृपया परिपाहि हरे ॥ ३ ॥

अधिवेंकटशैलमुदारमते र्जनताभिमताधिकदानरतात् ।
परदेवतया गदितान्निगमैः कमलादयितान्न परं कलये ॥ ४ ॥

कलवेणुरवावशगोपवधू शतकोटिवृतात्स्मरकोटिसमात् ।
प्रतिवल्लविकाभिमतात्सुखदात् वसुदेवसुतान्न परं कलये ॥ ५ ॥

अभिरामगुणाकर दाशरथे जगदेकधनुर्धर धीरमते ।
रघुनायक राम रमेश विभो वरदोभव देव दयाजलधे ॥ ६ ॥

अवनीतनयाकमनीयकरं रजनीकरचारुमुखांबुरुहम् ।
रजनीचरराजतमोमिहिरं महनीयमहं रघुराम मये ॥ ७ ॥

सुमुखं सुहृदं सुलभं सुखदं स्वनुजं च सुखायममोघशरम् ।
अपहाय रघूद्वहमन्यमहं न कथंचन कंचन जातु भजे ॥ ८ ॥

विना वेंकटेशं न नाथो न नाथः सदा वेंकटेशं स्मरामि स्मरामि ।
हरे वेंकटेश प्रसीद प्रसीद प्रियं वेंकटेश प्रयच्छ प्रयच्छ ॥ ९ ॥
अहं दूरतस्ते पदांभोजयुग्म प्रणामेच्छयाऽऽगत्य सेवां करोमि ।
सकृत्सेवया नित्यसेवाफलं त्वं प्रयच्छ प्रयच्छ प्रभो वेंकटेश ॥ १० ॥

अज्ञानिना मया दोषानशेषान्विहितान्हरे ।
क्षमस्व त्वं क्षमस्व त्वं शेषशैल शिखामणे ॥ ११ ॥

## श्री वेंकटेश्वर प्रपत्ति

ईशानां जगतोऽस्य वेंकटपतेः विष्णोः परां प्रेयसीं
तद्वक्षस्स्थल नित्य वासरसिकांतत्क्षांति संवर्धिनीं ।
पद्मालंकृतपाणिपल्लवयुगां पद्मासनस्थां श्रियं
वात्सल्यादिगुणोज्ज्वलां भगवतीं वंदे जगन्मातरं ॥ १ ॥

श्रीमन् कृपाजलनिधे कृतसर्वलोक–
सर्वज्ञ शक्त नतवत्सल सर्वशेषिन् ।
स्वामिन् सुशीलसुलभाश्रितपारिजात
श्रीवेंकटेशचरणौ शरणं प्रपद्ये ॥ २ ॥

आनूपुरार्पितसुजातसुगंधिपुष्प–
सौरभ्यसौरभकरौ समसन्निवेशौ ।
सौम्यौ सदाऽनुभवनेऽपि नवानुभाव्यौ
श्रीवेंकटेशचरणौ शरणं प्रपद्ये ॥ ३ ॥

सद्योविकासिसमुदित्वरसांद्रराग
सौरभ्यनिर्भरसरोरुहसाम्यवार्तां ।
सम्यक्षु साहसपदेषु विलेखयंतौ
श्रीवेंकटेशचरणौ शरणं प्रपद्ये ॥ ४ ॥

रेखामयध्वजसुधाकलशातपत्र
वज्रांकुशांबुरुहकल्पकशंखचक्रैः ।
भव्यैरलंकृततलौ परतत्व चिह्नैः
श्रीवेंकटेशचरणौ शरणं प्रपद्ये ॥ ५ ॥

ताम्रोदरद्युतिपराजितपद्मरागौ
बाह्यैर्महोभिरभिभूतमहेंद्रनीलौ ।
उद्यन्नखांशुभिरुदस्तशशांकभासौ
श्रीवेंकटेशचरणौ शरणं प्रपद्ये ॥ ६ ॥

सप्रेमभीति कमलाकरपल्लवाभ्यां
संवाहनेऽपि सपदि क्लममादधानौ ।
कांताववांग्मनसगोचरसौकुमार्यौ
श्रीवेंकटेशचरणौ शरणं प्रपद्ये ॥ ७ ॥

लक्ष्मीमहीतदनुरूपनिजानुभाव
नीलादिदिव्यमहिषीकरपल्लवानां ।
आरुण्यसंक्रमणतः किल सांद्ररागौ
श्रीवेंकटेशचरणौ शरणं प्रपद्ये ॥ ८ ॥

नित्यान्नमद्विधिशिवादिकिरीटकोटि
प्रत्युप्त दीप्त नवरत्न महःप्ररोहैः ।
नीराजना विधिमुदारमुपादधानौ
श्रीवेंकटेशचरणौ शरणं प्रपद्ये ॥ ९ ॥

विष्णोः पदे परम इत्युतिदप्रशंसौ
यौ मध्व उत्स इति भोग्यतयाऽप्युपात्तौ ।
भूयस्तथेति तव पाणितलप्रदिष्टौ
श्रीवेंकटेशचरणौ शरणं प्रपद्ये ॥ १० ॥

पार्थाय तत्सदृश सारथिना त्वयैव
यौ दर्शितौ स्वचरणौ शरणं व्रजेति ।
भूयोऽपि मह्यमिहतौ करदर्शितौ ते
श्रीवेंकटेशचरणौ शरणं प्रपद्ये ॥ ११ ॥

मन्मूर्ध्नि कालियफणे विकटाटवीषु
श्री वेंकटाद्रिशिखरे शिरसि श्रुतीनां ।
चित्तेऽप्यनन्यमनसां सममाहितौते
श्रीवेंकटेशचरणौ शरणं प्रपद्ये ॥ १२ ॥

अम्लानहृष्यदवनीतलकीर्णपुष्पौ
श्रीवेंकटाद्रि शिखराभरणायमानौ ।
आनंदिताखिल मनो नयनौ तवैतौ
श्रीवेंकटेशचरणौ शरणं प्रपद्ये ॥ १३ ॥

प्रायः प्रपन्न जनता प्रथमावगाह्यौ
मातुस्स्तनाविव शिशोरमृतायमानौ ।
प्राप्तौपरस्परतुलामतुलांतरौ ते
श्रीवेंकटेशचरणौ शरणं प्रपद्ये ॥ १४ ॥

सत्वोत्तरैस्सतत सेव्यपदांबुजेन
संसारतारकदयार्द्र दृगंचलेन ।
सौम्योपयंतृमुनिना मम दर्शितौ ते
श्रीवेंकटेशचरणौ शरणं प्रपद्ये ॥ १५ ॥

श्रीशश्रिया घटिकया त्वदुपायभावे
प्राप्ये त्वयि स्वयमुपेयतयास्फुरंत्या ।
नित्याश्रिताय निरवद्यगुणाय तुभ्यं
स्यां किंकरो वृषगिरीश न जातु मह्यम् ॥ १६ ॥

श्री वेंकटेश्वर मंगळाशासनं

श्रियः कांताय कळ्याण निधये निधयेऽर्थिनां
श्रीवेंकटनिवासाय श्रीनिवासाय मंगळम् ॥ १ ॥

लक्ष्मी सविभ्रमालोक सुभ्रू विभ्रमचक्षुषे
चक्षुषे सर्वलोकानां वेंकटेशाय मंगळम् ॥ २ ॥

श्री वेंकटाद्रि शृंगाग्र मंगळाभरणांघ्रये
मंगळानां निवासाय श्रीनिवासाय मंगळम् ॥ ३ ॥

सर्वावयवसौंदर्य संपदा सर्वचेतसां
सदा सम्मोहनायास्तु वेंकटेशाय मंगळम् ॥ ४ ॥

नित्याय निरवद्याय सत्यानंदचिदात्मने
सर्वांतरात्मने श्रीमद् वेंकटेशाय मंगळम् ॥ ५ ॥

स्वतस्सर्वविदे सर्वशक्तये सर्वशेषिणे
सुलभाय सुशीलाय वेंकटेशाय मंगळम् ॥ ६ ॥

परस्मै ब्रह्मणे पूर्णकामाय परमात्मने
प्रयुंजे परतत्त्वाय वेंकटेशाय मंगळम् ॥ ७ ॥

आकाल तत्त्वमश्रांतमात्मनामनुपश्यतां
अतृप्त्यमृतरूपाय वेंकटेशाय मंगळम् ॥ ८ ॥

प्रायस्स्वचरणौ पुंसां शरण्यत्वेन पाणिना
कृपयाऽऽदिशते श्रीमद् वेंकटेशाय मंगळम् ॥ ९ ॥

दयामृततरंगिण्यास्तरंगैरिवशीतलैः
अपांगैः सिंचते विश्वं वेंकटेशाय मंगळम् ॥ १० ॥

स्रग्भूषांबरहेतीनां सुषमावह मूर्तये
सर्वार्तिशमनायास्तु वेंकटेशाय मंगळम् ॥ ११ ॥

श्रीवैकुंठविरक्ताय स्वामिपुष्करिणीतटे
रमया रममाणाय वेंकटेशाय मंगळम् ॥ १२ ॥

श्रीमत्सुंदरजामातृ मुनिमानसवासिने
सर्वलोकनिवासाय श्रीनिवासाय मंगळम् ॥ १३ ॥

मंगळाशासनपरैर्मदाचार्य पुरोगमैः
सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मंगळम् ॥ १४ ॥

# पुरुष सूक्तं

ॐ तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवीः
स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् ।
शन्नो अस्तु द्विपदे । शं चतुष्पदे ॥ ॐ शान्तिः शान्तिः
शान्तिः ॥

ॐ सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात् । स भूमिं
विश्वतो वृत्वा । अत्यतिष्ठद्दशाङ्गुलम् । पुरुष ऐवेदग्ं सर्वम् ।
यद्भूतं यच्च भव्यम् । उतामृतत्वस्येशानः । यदन्नेनातिरोहति ।
ऐतावानस्य महिमा । अतो ज्यायाग्श्च पूरुषः ॥ १ ॥ पादोऽस्य
विश्वा भूतानि । त्रिपादस्यामृतं दिवि । त्रिपादूर्ध्व उदैत्पुरुषः ।
पादोऽस्येहाऽऽभवात्पुनः । ततो विष्वङ्व्यक्रामत् । साशनानशने
अभि । तस्माद्विराडजायत । विराजो अधि पूरुषः । स जातो
अत्यरिच्यत । पश्चाद्भूमिमथो पुरः ॥ २ ॥ यत्पुरुषेण हविषा ।
देवा यज्ञमतन्वत । वसन्तो अस्यासीदाज्यम् । ग्रीष्म

इध्मश्शरद्धविः । सप्तास्यासन्परिधयः । त्रिः सप्त समिधः
कृताः । देवा यद्यज्ञं तन्वानाः । अबध्नन्पुरुषं पशुम् । तं यज्ञं
बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः ॥ ३ ॥ तेन देवा अयजन्त
। साध्या ऋषयश्च ये । तस्माद्यज्ञात्सर्वहुतः । संभृतं पृषदाज्यम्
। पशूग्स्ताग्श्चक्रे वायव्यान् । आरण्यान्ग्राम्याश्च ये ।
तस्माद्यज्ञात्सर्वहुतः । ऋचः सामानि जज्ञिरे । छन्दाग्ंसि
जज्ञिरे तस्मात् । यजुस्तस्मादजायत ॥ ४ ॥ तस्मादश्वा
अजायन्त । ये के चोभयादतः । गावो ह जज्ञिरे तस्मात् ।
तस्माज्जाता अजावयः । यत्पुरुषं व्यदधुः । कतिधा
व्यकल्पयन् । मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते ।
ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः ॥ ५ ॥ ऊरू
तदस्य यद्वैश्यः । पद्भ्याग्ं शूद्रो अजायत । चन्द्रमा मनसो
जातः । चक्षोः सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च ।
प्राणाद्वायुरजायत । नाभ्या आसीदन्तरिक्षम् । शीर्ष्णो द्यौः
समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात् । तथा लोकाग्ं

अकल्पयन् ॥ ६ ॥ वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं
तमसस्तु पारे । सर्वाणि रूपाणि विचित्य धीरः । नामानि
कृत्वाऽभिवदन्, यदास्ते । धाता पुरस्ताद्यमुदाजहार । शक्रः
प्रविद्वान्प्रदिशश्चतस्रः । तमेवं विद्वानमृत इह भवति । नान्यः
पन्था अयनाय विद्यते । यज्ञेन यज्ञमयजन्त देवाः । तानि
धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्ते । यत्र
पूर्वे साध्याः सन्ति देवाः ॥ ७ ॥ अद्भ्यः संभूतः पृथिव्यै
रसाच्च । विश्वकर्मणः समवर्तताधि । तस्य त्वष्टा विदधद्रूपमेति
। तत्पुरुषस्य विश्वमाजानमग्रे । वेदाहमेतं पुरुषं महान्तम् ।
आदित्यवर्णं तमसः परस्तात् । तमेवं विद्वानमृत इह भवति ।
नान्यः पन्था विद्यतेयऽनाय । प्रजापतिश्चरति गर्भे अन्तः ।
अजायमानो बहुधा विजायते ॥ ८ ॥ तस्य धीराः परिजानन्ति
योनिम् । मरीचीनां पदमिच्छन्ति वेधसः । यो देवेभ्य आतपति
। यो देवानां पुरोहितः । पूर्वो यो देवेभ्यो जातः । नमो रुचाय
ब्राह्मये । रुचं ब्राह्मं जनयन्तः । देवा अग्रे तदब्रुवन् । यस्त्वैवं

ब्राह्मणो विद्यात् । तस्य देवा असन् वशे ॥ ९ ॥ ह्रीश्च ते
लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे । नक्षत्राणि रूपम् । अश्विनौ
व्यात्तम् । इष्टं मनिषाण । अमुं मनिषाण । सर्वं मनिषाण ॥ १०
॥

# नारायण सूक्तम्

ॐ ॥ सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवम् । विश्वं
नारायणं देवमक्षरं परमं पदम् । विश्वतः परमान्नित्यं विश्वं
नारायणगं हरिम् । विश्वमेवेदं पुरुष–स्तद्विश्व–मुपजीवति ।
पतिं विश्वस्यात्मेश्वरगं शाश्वतगं शिवमच्युतम् । नारायणं
महाज्ञेयं विश्वात्मानं परायणम् । नारायणपरो ज्योतिरात्मा
नारायणः परः । नारायणपरं ब्रह्म तत्त्वं नारायणः परः ।
नारायणपरो ध्याता ध्यानं नारायणः परः । यच्च
किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा ॥ अन्तर्बहिश्च तत्सर्वं
व्याप्य नारायणः स्थितः । अनन्तमव्ययं कविगं समुद्रेऽन्तं
विश्वशंभुवम् । पद्मकोश प्रतीकाशगं हृदयं चाप्यधोमुखम् ।
अधो निष्ट्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति ।
ज्वालमालाकुलं भाती विश्वस्यायतनं महत् । सन्ततगं

शिलाभिस्तु लंबत्याकोशसन्निभम् । तस्यान्ते सुषिरग्ं सूक्ष्मं
तस्मिन् सर्वं प्रतिष्ठितम् । तस्य मध्ये महानग्नि–र्विश्वार्चि–
र्विश्वतोमुखः । सोऽग्रभुग्विभजन्तिष्ठन्नाहारमजरः कविः ।
तिर्यगूर्ध्वमधश्शायी रश्मयस्तस्य सन्तता । सन्तापयति स्वं
देहमापादतलमस्तकः । तस्य मध्ये वह्निशिखा अणीयोर्ध्वा
व्यवस्थितः । नीलतो–यदमध्यस्था–द्विद्युल्लेखेव भास्वरा ।
नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा । तस्याः शिखाया
मध्ये परमात्मा व्यवस्थितः । स ब्रह्म स शिवः स हरिः सेन्द्रः
सोऽक्षरः परमः स्वराट् ॥ ऋतग्ं सत्यं परं ब्रह्म पुरुषं
कृष्णपिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ।
ॐ नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः
प्रचोदयात् ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

# श्रीसूक्तम् ॥

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् । चन्द्रां हिरण्मयीं लक्ष्मीं
जातवेदो म आवह ॥ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥ अश्वपूर्वां रथमध्यां
हस्तिनाद–प्रबोधिनीम् । श्रियं देवीमुपह्वये श्रीर्मा देवीर्जुषताम् ॥ कां
सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् । पद्मे
स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥ चन्द्रां प्रभासां यशसा
ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् । तां पद्मिनीमीं शरणमहं
प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥ आदित्यवर्णे तपसोऽधिजातो
वनस्पतिस्तव वृक्षोऽथ बिल्वः । तस्य फलानि तपसा नुदन्तु
मायान्तरायाश्च बाह्या अलक्ष्मीः ॥ उपैतु मां देवसखः कीर्तिश्च
मणिना सह । प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥
क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् । अभूतिमसमृद्धिं च
सर्वां निर्णुद मे गृहात् ॥ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीग्ं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ मनसः काममाकूतिं

U U I UU U I U U I U I
वाचः सत्यमशीमहि । पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥
U I I UU UU I U I U I U U I
कर्दमेन प्रजाभूता मयि संभव कर्दम । श्रियं वासय मे कुले मातरं
U I I U I U UU U U I U
पद्ममालिनीम् ॥ आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
I U UU I U I U U U I UU
नि च देवीं मातरं श्रियं वासय मे कुले ॥ आर्द्रां पुष्करिणीं पुष्टिं
UU I U U U I U I U I
पिङ्गलां पद्ममालिनीम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह
U U I UU UU I U U U I
॥ आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम् । सूर्यां हिरण्मयीं
U U I U I U IU I
लक्ष्मीं जातवेदो म आवह ॥ तां म आवह जातवेदो
U I U ॥ U I U IU I U ॥
लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्,
U U I U
विन्देयं पुरुषानहम् ॥

U I U U ॥ U I U U I U
यः शुचिः प्रयतो भूत्वा जुहुयादाज्यस् मन्वहम् । श्रीयः पञ्चदशार्चं
U I U I
च श्रीकामः सततं जपेत् ॥

आनंदः कर्दमश्चैव चिक्लीत इति विशृताः ।
ऋषयस्ते स्वय़ं पुत्राः स्वयं श्रीदेवि देवता ॥
पद्मानने पद्म ऊरू पद्माक्षी पद्म संभ्हवे ।
त्वं मां भजस्व पद्माक्षी येन सौख्यं लभाम्यहं ॥
अश्वदायि च गोदायि धनदायि महाधने ।
धनं मे जुषतां देवीं सर्व कामार्ध सिध्दये ॥
पुत्र पौत्र धनं धान्यं हस्त्यश्वाजापिगोरधं । भवसि माता आयुष्मंतं

करोतु मां ॥
चंद्राभां लक्ष्मीमीशानां सूर्याभां श्रियमीश्वरीं ।
चंद्र सूर्याग्नि सर्वाभां श्री महालक्ष्मीमुपास्महे ॥
धनमग्निर्धनं वायुर्धनं सूर्योधनं वसुः ।
धनमिन्द्रोबृहस्पतिः वरुणं धनमश्नुते ॥
वैनतेयसोमं पिबसोमं पिबतु वृत्रः ।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनी ॥
न क्रोधो न च मात्सर्यं न लोभो नाशुभामतिः ।
भवंति कृतपुण्यानां भक्तानां श्री सूक्तं जपेत्सदा ॥
वर्षंतु ते विभावरिदिवो अभ्रस्य विद्युतः ।
रोहन्तु सर्व बीजान्यव ब्रह्म द्विषोजहि ॥
पद्मप्रिये पद्मिनि पद्म हस्ते पद्मालये पद्मदळायताक्षी ।
विश्वप्रिये विष्णुमनोनुकूले त्वत्पादपद्मं मयि सन्निधस्व ॥
∪ ∪ । ∪ । ∪ । ।
ॐ महालक्ष्मै च विद्महे विष्णुपत्न्यै च धीमहि । तन्नो लक्ष्मीः
∪ ॥
प्रचोदयात् ॥
यासा पद्मासनस्था विपुलकटितटी पद्म पत्रायताक्षी ।
गंभीरावर्तनाभि स्थनभरणमिता शुभ्र वस्त्रोत्तरीया ॥
लक्ष्मीर्दिव्यैर्गजेन्द्रैः मणिगणखचितैः स्नापिता हेमकुंभैः ।
नित्यं सा प्द्महस्ता मम वसतु गृहे सर्वमांगळ्ययुक्ता ॥
लक्ष्मीं क्षीरसमुद्रराज तनयां श्रीरंगधामेश्वरीं ।
दासीभूत समस्त देव वनितां लोकैकदीपांकुरां ॥
श्रीमन्मंद कटाक्षलब्ध विभव ब्रह्मेन्द्र गंगाधरां ।

त्वां त्रैलोक्य कुटुंबिनीं सरसिजां वंदे मुकुन्द प्रियां ॥

सिद्धलक्ष्मीर्मोक्षलक्ष्मीर्जयलक्ष्मीः सरस्वती ।

श्रीर्लक्ष्मीः वरलक्ष्मीश्च प्रसन्न मम सर्वदा ॥

वरांकुशौ पाशमभीतिमुद्रां करैर्वहंतीं कमलासनस्थां ।

बालार्क कोटि प्रतिभां त्रिनेत्रां भजेहमंबां जगदीश्वरीं त्वां ॥

सर्वमंगळ मांगल्ये शिवे सर्वार्थ साधिके ।

शरण्ये त्र्यंबके देवी नारायणि नमोस्तु ते ॥

U U | U | U | |
ॐ महालक्ष्मै च विद्महे विष्णुपत्न्यै च धीमहि । तन्नो लक्ष्मीः
U ||
प्रचोदयात् ॥

ॐ शान्तिः शान्तिः शान्तिः

# दुर्गा सूक्तं

ॐ जातवेदसे सुनवाम सोम मरातीयतो निदहाति वेदः । स
नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः ॥
तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् ।
दुर्गां देवीग्ं शरणमहं प्रपद्ये सुतरसि तरसे नमः ॥ अग्ने त्वं
पारया नव्यो अस्मान्थ्स्वस्तिभिरति दुर्गाणि विश्वा । पूश्च पृथ्वी
बहुला न उर्वी भवा तोकाय तनयाय शंयोः ॥ विश्वानि नो
दुर्गहा जातवेदः सिन्धुन्न नावा दुरिताऽतिपर्षि । अग्ने
अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम् ॥ पृतना
जितग्ं सहमानमुग्रमग्निग्ं हुवेम परमाथ्सधस्थात् । स नः
पर्षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरिताऽत्यग्निः ॥ प्रत्नोषि
कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि । स्वाञ्चाऽग्ने
तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व ॥ गोभिर्जुष्टमयुजो

निषिक्तं तवेन्द्र विष्णोरनुसञ्चरेम । नाकस्य पृष्ठमभि संवसानो
वैष्णवीं लोक इह मादयन्ताम् ॥ ॐ कात्यायनाय विद्महे
कन्यकुमारि धीमहि । तन्नो दुर्गिः प्रचोदयात् ॥ ॐ शान्तिः
शान्तिः शान्तिः ॥

## श्री विष्णुसहस्रनामस्तोत्रं – पूर्वपीठिक

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशांतये ॥ १ ॥

यस्य द्विरदवक्त्राद्याः पारिषद्याः परः शतम् ।
विघ्नं निघ्नंति सततं विष्वकसेनं तमाश्रये ॥ २ ॥

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वंदे शुकतातं तपोनिधिम् ॥ ३ ॥

व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे ।
नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः ॥ ४ ॥

अविकाराय शुद्धाय नित्याय परमात्मने ।
सदैकरूपरूपाय विष्णवे सर्वजिष्णवे ॥ ५ ॥

यस्य स्मरणमात्रेण जन्मसंसारबंधनात् ।
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥ ६ ॥

ॐ नमो विष्णवे प्रभविष्णवे ।

श्रीवैशंपायन उवाच–
श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः ।
युधिष्ठिरः शांतनवं पुनरेवाभ्यभाषत ॥ ७ ॥

युधिष्ठिर उवाच–
किमेकं दैवतं लोके किं वाप्येकं परायणम् ।
स्तुवंतः कं कमर्चंतः प्राप्नुयुर्मानवाः शुभम् ॥ ८ ॥

को धर्मः सर्वधर्माणां भवतः परमो मतः ।
किं जपन्मुच्यते जंतुर्जन्मसंसारबंधनात् ॥ ९ ॥

श्री भीष्म उवाच–
जगत्प्रभुं देवदेवमनंतं पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः ॥ १० ॥

तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम् ।
ध्यायन्स्तुवन्नमस्यंश्च यजमानस्तमेव च ॥ ११ ॥

अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ।
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ॥ १२ ॥

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् ।
लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् ॥ १३ ॥

ऐष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।
यद्भक्त्या पुंडरीकाक्षं स्तवैरर्चेन्नरः सदा ॥ १४ ॥

परमं यो महत्तेजः परमं यो महत्तपः ।
परमं यो महद्ब्रह्म परमं यः परायणम् ॥ १५ ॥

पवित्राणां पवित्रं यो मंगळानां च मंगळम् ।
दैवतं दैवतानां च भूतानां योऽव्ययः पिता ॥ १६ ॥

यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ।
यस्मिंश्च प्रळयं यांति पुनरेव युगक्षये ॥ १७ ॥

तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ।
विष्णोर्नामसहस्रं मे शृणु पापभयापहम् ॥ १८ ॥

यानि नामानि गौणानि विख्यातानि महात्मनः ।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ॥ १९ ॥

ऋषिर्नाम्नां सहस्रस्य वेदव्यासो महामुनिः ।
छंदोऽनुष्टुप् तथा देवो भगवान्देवकीसुतः ॥ २० ॥

अमृतांशूद्भवो बीजं शक्तिर्देवकिनंदनः ।
त्रिसामा हृदयं तस्य शांत्यर्थे विनियुज्यते ॥ २१ ॥

अनेकरूप दैत्यांतं नमामि पुरुषोत्तमम् ॥ २२ ॥
विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम् ।
अनेकरूप दैत्यान्तं नमामि पुरुषोत्तमम् ॥

ॐ अस्य श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रमहामंत्रस्य ॥
श्री वेदव्यासो भगवानृषिः । अनुष्टुप् छंदः ।
श्रीमहाविष्णुः परमात्मा श्रीमन्नारायणो देवता ।
अमृतांशूद्भवो भानुरिति बीजम् ।
देवकीनंदनः स्रष्टेति शक्तिः ।
उद्भवः क्षोभणो देव इति परमो मंत्रः ।

शंखभृन्नंदकी चक्रीति कीलकम् ।
शार्ंगधन्वा गदाधर इत्यस्त्रम् ।
रथांगपाणिरक्षोभ्य इति नेत्रम् ।
त्रिसामा सामगः सामेति कवचम् ।
आनंदं परब्रह्मेति योनिः ।
ऋतुः सुदर्शनः काल इति दिग्बंधः ॥
श्रीविश्वरूप इति ध्यानम् ।
श्रीमहाविष्णुप्रीत्यर्थं सहस्रनामजपे विनियोगः ॥

॥ अथ ध्यानम् ।
क्षीरोदन्वत्प्रदेशे शुचिमणिविलसत्सैकतेर्मौक्तिकानां
मालाक्लुप्तासनस्थः स्फटिकमणिनिभैर्मौक्तिकैर्मंडितांगः ।
शुभ्रैरभ्रैरदभ्रैरुपरिविरचितैर्मुक्तपीयूष वर्षैः
आनंदी नः पुनीयादरिनलिनगदा शंखपाणिर्मुकुंदः ॥ १ ॥

भूः पादौ यस्य नाभिर्वियदसुरनिलश्चंद्र सूर्यौ च नेत्रे
कर्णावाशाः शिरो द्यौर्मुखमपि दहनो यस्य वास्तेयमब्धिः ।
अंतःस्थं यस्य विश्वं सुरनरखगगोभोगिगंधर्वदैत्यैः
चित्रं रंरम्यते तं त्रिभुवन वपुषं विष्णुमीशं नमामि ॥ २ ॥

ॐ शांताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभांगम् ।
लक्ष्मीकांतं कमलनयनं योगिहृध्यानगम्यं
वंदे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥ ३ ॥

मेघश्यामं पीतकौशेयवासं
श्रीवत्सांकं कौस्तुभोद्भासितांगम् ।
पुण्योपेतं पुंडरीकायताक्षं
विष्णुं वंदे सर्वलोकैकनाथम् ॥ ४ ॥

नमः समस्तभूतानामादिभूताय भूभृते ।
अनेकरूपरूपाय विष्णवे प्रभविष्णवे ॥ ५ ॥

सशंखचक्रं सकिरीटकुंडलं
सपीतवस्त्रं सरसीरुहेक्षणम् ।
सहारवक्षःस्थलशोभिकौस्तुभं
नमामि विष्णुं शिरसा चतुर्भुजम् ॥ ६ ॥

छायायां पारिजातस्य हेमसिंहासनोपरि
आसीनमंबुदश्याममायताक्षमलंकृतम् ।

चंद्राननं चतुर्बाहुं श्रीवत्सांकित वक्षसं
रुक्मिणी सत्यभामाभ्यां सहितं कृष्णमाश्रये ॥ ७ ॥

श्री विष्णु सहस्रनाम स्तोत्रं

ॐ विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ॥ १ ॥

पूतात्मा परमात्मा च मुक्तानांपरमागतिः ।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर ऐव च ॥ २ ॥

योगो योगविदां नेता प्रधानपुरुषेश्वरः ।
नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः ॥ ३ ॥

सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।
संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ॥ ४ ॥

स्वयंभूः शंभुरादित्यः पुष्कराक्षो महास्वनः ।
अनादिनिधनो धाता विधाता धातुरुत्तमः ॥ ५ ॥

अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।

विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥ ६ ॥

अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ।
प्रभूतस्त्रिककुब्धाम पवित्रं मंगळं परम् ॥ ७ ॥

ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ।
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥ ८ ॥

ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ॥ ९ ॥

सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः ।
अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ॥ १० ॥

अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः ।
वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः ॥ ११ ॥

वसुर्वसुमनाः सत्यः समात्माऽसम्मितः समः ।
अमोघः पुंडरीकाक्षो वृषकर्मा वृषाकृतिः ॥ १२ ॥

रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः ।
अमृतः शाश्वत स्थाणुर्वरारोहो महातपाः ॥ १३ ॥

सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः ।
वेदो वेदविदव्यंगो वेदांगो वेदवित् कविः ॥ १४ ॥

लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः ।
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥ १५ ॥

भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ।
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥ १६ ॥

उपेंद्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ।
अतींद्रः संग्रहः सर्गो धृतात्मा नियमो यमः ॥ १७ ॥

वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ।
अतींद्रियो महामायो महोत्साहो महाबलः ॥ १८ ॥

महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ।
अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् ॥ १९ ॥

महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः ।
अनिरुद्धः सुरानंदो गोविंदो गोविदां पतिः ॥ २० ॥

मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ।
हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥ २१ ॥

अमृत्युः सर्वदृक् सिंहः संधाता संधिमान् स्थिरः ।
अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ॥ २२ ॥

गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ।
निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ॥ २३ ॥

अग्रणीर्ग्रामणीः श्रीमान् न्यायो नेता समीरणः ।
सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् ॥ २४ ॥

आवर्तनो निवृत्तात्मा संवृतः संप्रमर्दनः ।
अहः संवर्तको वह्निरनिलो धरणीधरः ॥ २५ ॥

सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः ।

सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः ॥ २६ ॥

असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ।
सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसाधनः ॥ २७ ॥

वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ।
वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ॥ २८ ॥

सुभुजो दुर्धरो वाग्मी महेंद्रो वसुदो वसुः ।
नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥ २९ ॥

ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ।
ऋद्धः स्पष्टाक्षरो मंत्रश्चंद्रांशुर्भास्करद्युतिः ॥ ३० ॥

अमृतांशूद्भवो भानुः शशबिंदुः सुरेश्वरः ।
औषधं जगतः सेतुः सत्यधर्मपराक्रमः ॥ ३१ ॥

भूतभव्यभवन्नाथः पवनः पावनोऽनलः ।
कामहा कामकृत्कांतः कामः कामप्रदः प्रभुः ॥ ३२ ॥

युगादिकृद्युगावर्तो नैकमायो महाशनः ।
अदृश्यो व्यक्तरूपश्च सहस्रजिदनंतजित् ॥ ३३ ॥

इष्टोऽविशिष्टः शिष्टेष्टः शिखंडी नहुषो वृषः ।
क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ॥ ३४ ॥

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ।
अपांनिधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥ ३५ ॥

स्कंदः स्कंदधरो धुर्यो वरदो वायुवाहनः ।
वासुदेवो बृहद्भानुरादिदेवः पुरंदरः ॥ ३६ ॥

अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ।
अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः ॥ ३७ ॥

पद्मनाभोऽरविंदाक्षः पद्मगर्भः शरीरभृत् ।
महर्द्धिरृद्धो वृद्धात्मा महाक्षो गरुडध्वजः ॥ ३८ ॥

अतुलः शरभो भीमः समयज्ञो हविर्हरिः ।
सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिंजयः ॥ ३९ ॥

विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ।
महीधरो महाभागो वेगवानमिताशनः ॥ ४० ॥

उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ।
करणं कारणं कर्ता विकर्ता गहनो गुहः ॥ ४१ ॥

व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ।
परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः ॥ ४२ ॥

रामो विरामो विरजो मार्गो नेयो नयोऽनयः ।
वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ॥ ४३ ॥

वैकुंठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ।
हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥ ४४ ॥

ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ।
उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ॥ ४५ ॥

विस्तारः स्थावरस्थाणुः प्रमाणं बीजमव्ययम् ।

अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ॥ ४६ ॥

अनिर्विण्णः स्थविष्ठोऽभूर्धर्मयूपो महामखः ।
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ॥ ४७ ॥

यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः ।
सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ॥ ४८ ॥

सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् ।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥ ४९ ॥

स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् ।
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥ ५० ॥

धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरम् ।
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ॥ ५१ ॥

गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः ।
आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥ ५२ ॥

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
शरीरभूतभृद्भोक्ता कपींद्रो भूरिदक्षिणः ॥ ५३ ॥

सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः ।
विनयो जयः सत्यसंधो दाशार्हः सात्त्वतांपतिः ॥ ५४ ॥

जीवो विनयिता साक्षी मुकुंदोऽमितविक्रमः ।
अंभोनिधिरनंतात्मा महोदधिशयोऽंतकः ॥ ५५ ॥

अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ।
आनंदो नंदनो नंदः सत्यधर्मा त्रिविक्रमः ॥ ५६ ॥

महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ।
त्रिपदस्त्रिदशाध्यक्षो महाशृंगः कृतांतकृत् ॥ ५७ ॥

महावराहो गोविंदः सुषेणः कनकांगदी ।
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥ ५८ ॥

वेधाः स्वांगोऽजितः कृष्णो दृढः संकर्षणोऽच्युतः ।
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ॥ ५९ ॥

भगवान् भगहाऽऽनंदी वनमाली हलायुधः ।
आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ॥ ६० ॥

सुधन्वा खंडपरशुर्दारुणो द्रविणप्रदः ।
दिवःस्पृक् सर्वदृग्व्यासो वाचस्पतिरयोनिजः ॥ ६१ ॥

त्रिसामा सामगः साम निर्वाणं भेषजं भिषक् ।
सन्न्यासकृच्छमः शांतो निष्ठा शांतिः परायणम् ॥ ६२ ॥

शुभांगः शांतिदः स्रष्टा कुमुदः कुवलेशयः ।
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥ ६३ ॥

अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ।
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतांवरः ॥ ६४ ॥

श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः ।
श्रीधरः श्रीकरः श्रेयः श्रीमान्लोकत्रयाश्रयः ॥ ६५ ॥

स्वक्षः स्वंगः शतानंदो नंदिर्ज्योतिर्गणेश्वरः ।

विजितात्माऽविधेयात्मा सत्कीर्तिश्छिन्नसंशयः ॥ ६६ ॥

उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतस्थिरः ।
भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ॥ ६७ ॥

अर्चिष्मानर्चितः कुंभो विशुद्धात्मा विशोधनः ।
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ॥ ६८ ॥

कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः ।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ॥ ६९ ॥

कामदेवः कामपालः कामी कांतः कृतागमः ।
अनिर्देश्यवपुर्विष्णुर्वीरोऽनंतो धनंजयः ॥ ७० ॥

ब्रह्मण्यो ब्रह्मकृद् ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ।
ब्रह्मविद् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥ ७१ ॥

महाक्रमो महाकर्मा महातेजा महोरगः ।
महाक्रतुर्महायज्वा महायज्ञो महाहविः ॥ ७२ ॥

स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोतारणप्रियः ।
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ॥ ७३ ॥

मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ।
वसुप्रदो वासुदेवो वसुर्वसुमना हविः ॥ ७४ ॥

सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः ।
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ॥ ७५ ॥

भूतावासो वासुदेवः सर्वासुनिलयोऽनलः ।
दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः ॥ ७६ ॥

विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ।
अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ॥ ७७ ॥

ऐको नैकः स्तवः कः किं यत्तत्पदमनुत्तमम् ।
लोकबंधुर्लोकनाथो माधवो भक्तवत्सलः ॥ ७८ ॥

सुवर्णवर्णो हेमांगो वरांगश्चंदनांगदी ।
वीरहा विषमः शून्यो घृताशीरचलश्चलः ॥ ७९ ॥

अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक् ।
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ॥ ८० ॥

तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः ।
प्रग्रहो निग्रहो व्यग्रो नैकशृंगो गदाग्रजः ॥ ८१ ॥

चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ॥ ८२ ॥

समावर्तोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः ।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥ ८३ ॥

शुभांगो लोकसारंगः सुतंतुस्तंतुवर्धनः ।
इंद्रकर्मा महाकर्मा कृतकर्मा कृतागमः ॥ ८४ ॥

उद्भवः सुंदरः सुंदो रत्ननाभः सुलोचनः ।
अर्को वाजसनः शृंगी जयंतः सर्वविज्जयी ॥ ८५ ॥

सुवर्णबिंदुरक्षोभ्यः सर्ववागीश्वरेश्वरः ।

महाह्रदो महागर्तो महाभूतो महानिधिः ॥ ८६ ॥

कुमुदः कुंदरः कुंदः पर्जन्यः पावनोऽनिलः ।
अमृतांशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः ॥ ८७ ॥

सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ।
न्यग्रोधोऽदुंबरोऽश्वत्थश्चाणूरांध्रनिषूदनः ॥ ८८ ॥

सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ।
अमूर्तिरनघोऽचिन्त्यो भयकृद्भयनाशनः ॥ ८९ ॥

अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् ।
अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः ॥ ९० ॥

भारभृत् कथितो योगी योगीशः सर्वकामदः ।
आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ॥ ९१ ॥

धनुर्धरो धनुर्वेदो दंडो दमयिता दमः ।
अपराजितः सर्वसहो नियंताऽनियमोऽयमः ॥ ९२ ॥

सत्त्ववान् सात्त्विकः सत्यः सत्यधर्मपरायणः ।
अभिप्रायः प्रियार्होऽर्हः प्रियकृत् प्रीतिवर्धनः ॥ ९३ ॥

विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ।
रविर्विरोचनः सूर्यः सविता रविलोचनः ॥ ९४ ॥

अनंतो हुतभुग्भोक्ता सुखदो नैकजोऽग्रजः ।
अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ॥ ९५ ॥

सनात्सनातनतमः कपिलः कपिरव्ययः ।
स्वस्तिदः स्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्वस्तिदक्षिणः ॥ ९६ ॥

अरौद्रः कुंडली चक्री विक्रम्यूर्जितशासनः ।
शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ॥ ९७ ॥

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणांवरः ।
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥ ९८ ॥

उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः ।
वीरहा रक्षणः संतो जीवनः पर्यवस्थितः ॥ ९९ ॥

अनंतरूपोऽनंतश्रीर्जितमन्युर्भयापहः ।
चतुरश्रो गभीरात्मा विदिशो व्यादिशो दिशः ॥ १०० ॥

अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिरांगदः ।
जननो जनजन्मादिर्भीमो भीमपराक्रमः ॥ १०१ ॥

आधारनिलयोऽधाता पुष्पहासः प्रजागरः ।
ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ॥ १०२ ॥

प्रमाणं प्राणनिलयः प्राणभृत्प्राणजीवनः ।
तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः ॥ १०३ ॥

भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञांगो यज्ञवाहनः ॥ १०४ ॥

यज्ञभृद् यज्ञकृद् यज्ञी यज्ञभुग् यज्ञसाधनः ।
यज्ञांतकृद् यज्ञगुह्यमन्नमन्नाद ऐव च ॥ १०५ ॥

आत्मयोनिः स्वयंजातो वैखानः सामगायनः ।

देवकीनंदनः स्रष्टा क्षितीशः पापनाशनः ॥ १०६ ॥

शंखभृन्नंदकी चक्री शार्ङ्गधन्वा गदाधरः ।
रथांगपाणिरक्षोभ्यः सर्वप्रहरणायुधः ॥ १०७ ॥
सर्वप्रहरणायुध ॐ नम इति ।

वनमाली गदीशार्ङ्गी शंखी चक्री च नंदकी ।
श्रीमान् नारायणो विष्णुर्वासुदेवोऽभिरक्षतु ॥ १०८ ॥
श्री वासुदेवोऽभिरक्षतु ॐ नम इति ।

श्रीविष्णुसहस्रनामस्तोत्रं – उत्तरपीठिक

इतीदं कीर्तनीयस्य केशवस्य महात्मनः ।
नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम् ॥ १ ॥

य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
नाशुभं प्राप्नुयात्किंचित्सोऽमुत्रेह च मानवः ॥ २ ॥

वेदांतगो ब्राह्मणः स्यात्क्षत्रियो विजयी भवेत् ।
वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् ॥ ३ ॥

धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात् ।
कामानवाप्नुयात्कामी प्रजार्थी चाप्नुयात्प्रजाम् ॥ ४ ॥

भक्तिमान् यः सदोत्थाय शुचिस्तद्गतमानसः ।
सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत् ॥ ५ ॥

यशः प्राप्नोति विपुलं ज्ञातिप्राधान्यमेव च ।
अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम् ॥ ६ ॥

न भयं क्वचिदाप्नोति वीर्यं तेजश्च विंदति ।
भवत्यरोगो द्युतिमान्बलरूपगुणान्वितः ॥ ७ ॥

रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बंधनात् ।
भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः ॥ ८ ॥

दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः ॥ ९ ॥

वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः ।
सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् ॥ १० ॥

न वासुदेवभक्तानामशुभं विद्यते क्वचित् ।
जन्ममृत्युजराव्याधिभयं नैवोपजायते ॥ ११ ॥

इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ।
युज्येतात्मसुखक्षांतिश्रीधृतिस्मृतिकीर्तिभिः ॥ १२ ॥

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवंति कृत पुण्यानां भक्तानां पुरुषोत्तमे ॥ १३ ॥

द्यौः सचंद्रार्कनक्षत्रा खं दिशो भूर्महोदधिः ।
वासुदेवस्य वीर्येण विधृतानि महात्मनः ॥ १४ ॥

ससुरासुरगंधर्वं सयक्षोरगराक्षसम् ।
जगद्वशे वर्ततेदं कृष्णस्य सचराचरम् ॥ १५ ॥

इंद्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः ।
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ ऐव च ॥ १६ ॥

सर्वागमानामाचारः प्रथमं परिकल्पते ।
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ॥ १७ ॥

ऋषयः पितरो देवा महाभूतानि धातवः ।
जंगमाजंगमं चेदं जगन्नारायणोद्भवम् ॥ १८ ॥

योगो ज्ञानं तथा सांख्यं विद्याः शिल्पादि कर्म च ।
वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात् ॥ १९ ॥

ऐको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ।
त्रीन्लोकान्व्याप्य भूतात्मा भुंक्ते विश्वभुगव्ययः ॥ २० ॥

इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम् ।
पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च ॥ २१ ॥

विश्वेश्वरमजं देवं जगतः प्रभुमव्ययम् ।
भजंति ये पुष्कराक्षं न ते यांति पराभवम् ॥ २२ ॥
न ते यांति पराभवम् ॐ नम इति ।

अर्जुन उवाच–
पद्मपत्रविशालाक्ष पद्मनाभ सुरोत्तम ।
भक्तानामनुरक्तानां त्राता भव जनार्दन ॥ २३ ॥

श्रीभगवानुवाच–
यो मां नामसहस्रेण स्तोतुमिच्छति पांडव ।
सोहऽमेकेन श्लोकेन स्तुत ऐव न संशयः ॥ २४ ॥
स्तुत ऐव न संशय ॐ नम इति ।

व्यास उवाच–
वासनाद्वासुदेवस्य वासितं भुवनत्रयम् ।
सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते ॥ २५ ॥
श्री वासुदेव नमोऽस्तुत ॐ नम इति ।
पार्वत्युवाच–
केनोपायेन लघुना विष्णोर्नामसहस्रकम् ।
पठ्यते पंडितैर्नित्यं श्रोतुमिच्छाम्यहं प्रभो ॥ २६ ॥
ईश्वर उवाच–
श्रीराम राम रामेति रमे रामे मनोरमे ।
सहस्रनाम तत्तुल्यं राम नाम वरानने ॥ २७ ॥
श्रीरामनाम वरानन ॐ नम इति ।

ब्रह्मोवाच–
नमोऽस्त्वनंताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटी युगधारिणे नमः ॥
२८ ॥
सहस्रकोटी युगधारिणे ॐ नम इति ।

संजय उवाच–
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ २९ ॥
श्रीभगवानुवाच–
अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ ३० ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ ३१ ॥
आर्ताः विषण्णाः शिथिलाश्च भीताः घोरेषु च व्याधिषु वर्तमानाः
।
संकीर्त्य नारायणशब्दमात्रं विमुक्तदुःखाः सुखिनो भवंतु ॥ ३२
॥

कायेन वाचा मनसेंद्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥ ३३ ॥

॥ इति श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रं संपूर्णम् ॥

# श्री लक्ष्मी अष्टोत्तरशतनाम स्तोत्रं

देव्युवाच–
देवदेव महादेव त्रिकालज्ञ महेश्वर ।
करुणाकर देवेश भक्तानुग्रहकारक ॥ १ ॥
अष्टोत्तरशतं लक्ष्म्याः श्रोतुमिच्छामि तत्त्वतः ।
ईश्वर उवाच–
देवि साधु महाभागे  महाभाग्यप्रदायकम् ।
सर्वैश्वर्यकरं पुण्यं सर्वपापप्रणाशनम् ॥ २ ॥
सर्वदारिद्र्यशमनं श्रवणाद्भुक्तिमुक्तिदम् ।
राजवश्यकरं दिव्यं गुह्याद्गुह्यतमं परम् ॥ ३ ॥
दुर्लभं सर्वदेवानां चतुःषष्टिकळास्पदम् ।
पद्मादीनां वरांतानां विधीनां नित्यदायकम् ॥ ४ ।
समस्तदेवसंसेव्यमणिमाद्यष्टसिद्धिदम् ।
किमत्र बहुनोक्तेन देवी प्रत्यक्षदायकम् ॥ ५ ॥
तव प्रीत्याद्य वक्ष्यामि समाहितमनाः श्रृणु ।
अष्टोत्तरशतस्यास्य महालक्ष्मीस्तु देवता ॥ ६ ॥
क्लींबीजपदमित्युक्तं शक्तिस्तु भुवनेश्वरी । अंगन्यासः करन्यास
स इत्यादिः प्रकीर्तितः ॥ ७ ॥
ध्यानम्

वंदे पद्मकरां प्रसन्नवदनां सौभाग्यदां भाग्यदां
हस्ताभ्यामभयप्रदां मणिगणैर्नानाविधैर्भूषिताम् ।
भक्ताभीष्टफलप्रदां हरिहरब्रह्मादिभिः सेवितां पार्श्वे
पंकजशंखपद्मनिधिभिर्युक्तां सदा शक्तिभिः ॥ ८ ॥
सरसिजनयने सरोजहस्ते धवलतरांशुकगंधमाल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ ९
॥
प्रकृतिं विकृतिं विद्यां सर्वभूतहितप्रदाम् ।
श्रद्धां विभूतिं सुरभिं नमामि परमात्मिकाम् ॥ १० ॥
वाचं पद्मालयां पद्मां शुचिं स्वाहां स्वधां सुधाम् । धन्यां
हिरण्मयीं लक्ष्मीं नित्यपुष्टां विभावरीम् ॥ ११ ॥
अदितिं च दितिं दीप्तां वसुधां वसुधारिणीम् । नमामि कमलां
कांतां कामाक्षीं क्रोधसंभवाम् ॥ १२ ॥
अनुग्रहपदां बुद्धिमनघां हरिवल्लभाम् । अशोकाममृतां दीप्तां
लोकशोकविनाशिनीम् ॥ १३ ॥
नमामि धर्मनिलयां करुणां लोकमातरम् ।
पद्मप्रियां पद्महस्तां पद्माक्षीं पद्मसुंदरीम् ॥ १४ ॥
पद्मोद्भवां पद्ममुखीं पद्मनाभप्रियां रमां ।
पद्ममालाधरां देवीं पद्मिनीं पद्मगंधिनीम् ॥ १५ ॥
पुण्यगंधां सुप्रसन्नां प्रसादाभिमुखीं प्रभाम् । नमामि चंद्रवदनां

चंद्रां चंद्रसहोदरीम् ॥ १६ ॥
चतुर्भुजां चंद्ररूपामिंदिरामिंदुशीतलाम् । आह्लादजननीं पुष्टिं शिवां शिवकरीं सतीम् ॥ १७ ॥
विमलां विश्वजननीं तुष्टिं दारिद्यनाशिनीम् । प्रीतिपुष्करिणीं शांतां शुक्लमाल्यांबरां श्रियम् ॥ १८ ॥
भास्करीं बिल्वनिलयां वरारोहां यशस्विनीम् । वसुंधरामुदारांगीं हरिणीं हेममालिनीम् ॥ १९ ॥ धनधान्यकरीं सिद्धिं स्त्रैणसौम्यां शुभप्रदाम् । नृपवेश्मगतानंदां वरलक्ष्मीं वसुप्रदाम् ॥ २० ॥
शुभां हिरण्यप्राकारां समुद्रतनयां जयाम् ।
नमामि मंगळां देवीं विष्णुवक्षःस्थलस्थिताम् ॥ २१ ॥
विष्णुपत्नीं प्रसन्नाक्षीं नारायणसमाश्रिताम् । दारिद्यध्वंसिनीं देवीं सर्वोपद्रववारिणीम् ॥ २२ ॥ नवदुर्गां महाकाळीं ब्रह्मविष्णुशिवात्मिकाम् । त्रिकालज्ञानसंपन्नां नमामि भुवनेश्वरीम् ॥ २३ ॥
लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरंगधामेश्वरीं
दासीभूतसमस्तदेववनितां लोकैकदीपांकुराम् ।
श्रीमन्मंदकटाक्षलब्धविभवब्रह्मेंद्रगंगाधरां त्वां त्रैलोक्यकुटुंबिनीं सरसिजां वंदे मुकुंदप्रियाम् ॥ २४ ॥
मातर्नमामि कमले कमलायताक्षि श्रीविष्णुहृत्कमलवासिनि विश्वमातः । क्षीरोदजे कमलकोमलगर्भगौरि लक्ष्मीः प्रसीद

सततं नमतां शरण्ये ॥ २५ ॥
त्रिकालं यो जपेद्विद्वान् षण्मासं विजितेंद्रियः । दारिद्र्यध्वंसनं कृत्वा सर्वमाप्नोत्ययत्नतः ॥ २६ ॥ देवीनामसहस्रेषु पुण्यमष्टोत्तरं शतम् । येन श्रियमवाप्नोति कोटिजन्मदरिद्रतः ॥ २७ ॥

भृगुवारे शतं धीमान् पठेद्वत्सरमात्रकम् । अष्टैश्वर्यमवाप्नोति कुबेर इव भूतले ॥ २८ ॥

दारिद्र्यमोचनं नाम स्तोत्रमंबापरं शतम् । येन श्रियमवाप्नोति कोटिजन्मदरिद्रितः ॥ २९ ॥

भुक्त्वा तु विपुलान् भोगानस्याः सायुज्यमाप्नुयात् । प्रातःकाले पठेन्नित्यं सर्वदुःखोपशांतये । पठंस्तु चिंतयेद्देवीं सर्वाभरणभूषिताम् ॥ ३० ॥

# श्री महालक्ष्मी अष्टक स्तोत्रं

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते ।
शंखचक्रगदाहस्ते महालक्ष्मी नमोऽस्तुते ॥

नमस्ते गरुडारूढे कोलासुर–भयंकरि ।
सर्वपापहरे देवि महालक्ष्मी नमोऽस्तुते ॥

सर्वज्ञे सर्ववरदे सर्वदुष्ट भयंकरि ।
सर्वदुःखहरे देवि महालक्ष्मी नमोऽस्तुते ॥

सिद्धिबुद्धिप्रदे देवी भुक्ति मुक्ति प्रदायिनि ।
मंत्रमूर्ते सदा देवी महालक्ष्मी नमोऽस्तुते ॥

आद्यंतरहिते देवी आदिशक्ति महेश्वरि ।
योगज्ञे योगसंभूते महालक्ष्मी नमोऽस्तुते ॥

स्थूलसूक्ष्म–महारौद्रे महाशक्ति महोदरे ।
महापापहरे देवी महालक्ष्मी नमोऽस्तुते ॥

पद्मासनस्थिते देवी परब्रह्म–स्वरूपिणि ।
परमेशी जगन्मात महालक्ष्मी नमोऽस्तुते ॥

श्वेतांबरधरे देवी नानालंकार–भूषिते ।
जगत् स्थिते जगन्मात महालक्ष्मी नमोऽस्तुते ॥

महालक्ष्म्यष्टकं स्तोत्रं यः पठेद् भक्ति मान्नरः ।
सर्वसिद्धिमवाप्नोति राज्यं प्राप्नोति सर्वदा ॥

ऐककाले पठेन्नित्यं महापापविनाशनं ।
द्विकालं यः  पठेन्नित्यं धन–धान्य समन्वितः ॥

त्रिकालं यः पठेन्नित्यं महाशत्रुविनाशनं ।
महालक्ष्मीर्भवेन्नित्यं प्रसन्ना वरदा शुभा ॥

# श्री लक्ष्मी सहस्रनाम स्तोत्रं

नाम्नां साष्ट सहस्रं च ब्रूहि गार्ग्य महामते ।
महालक्ष्म्या महादेव्या भुक्तिमुक्त्यर्थसिद्धये ॥ १ ॥

श्री गार्ग्य उवाच–
सनत्कुमारमासीनं द्वादशादित्यसन्निभं ।
अपृच्छन्योगिनो भक्त्या योगिनामर्थसिद्धये ॥ २ ॥

सर्व लौकिक कर्मभ्यो विमुक्तानां हिताय वै ।
भुक्तिमुक्तिप्रदं जप्यमनुब्रूहि दयानिधे ॥ ३ ॥

सनत्कुमार भगवन् सर्वज्ञोऽसि विशेषतः ।
आस्तिक्य सिद्धये नृणां क्षिप्र धर्मार्थ साधनं ॥ ४ ॥

आद्यंति मानवाः सर्वे धनाभावेन केवलं ।
सिद्ध्यंति धनिनोऽन्यस्य नैव धर्मार्थ कामानाः ॥ ५ ॥

दारिद्र्यध्वंसिनी नाम केन विद्या प्रकीर्तिता ।
केन वा ब्रह्मविद्यापि केन मृत्युविनाशिनी ॥ ६ ॥

सर्वेषां सार भूतैका विद्यानां केन कीर्तिता ।
प्रत्यक्ष सिद्धिदा ब्रह्मन् तामाचक्ष्व दयानिधे ॥ ७ ॥

सनत्कुमार उवाच–
साधु पृष्टं महभागाः सर्वलोकहितैषिणः
महतामेष धर्मश्च नान्येषामिति मे मतिः ॥ ८ ॥

ब्रह्म विष्णु महादेव महेंद्रादि महात्मभिः ।
संप्रोक्तं कथयाम्यद्य लक्ष्मी नाम सहस्रकं ॥ ९ ॥

यस्योच्चारण मात्रेण दारिद्र्यान्मुच्यते नरः ।
किं पुनस्तज्जपाज्जापी सर्वेष्टार्थानवाप्नुयात् ॥ १० ॥

अस्य श्री लक्ष्मी दिव्य सहस्रनाम स्तोत्र महामंत्रस्य,
आनंद कर्दम चिक्लीतेंदिरासुतादयो महात्मानो महर्षयः,
अनुष्टुप् छंदः, विष्णुमाया शक्तिः, महालक्ष्मीः परा देवता,
श्री महालक्ष्मी प्रसादद्वारा सर्वेष्टार्थसिद्ध्यर्थे जपे विनियोगः ।
क्रौमित्यादि षडंगन्यासः ।

ध्यानं

पद्मनाभप्रियां देवीं पद्माक्षीं पद्मवासिनीं ।
पद्मवक्त्रां पद्महस्तां वंदे पद्मामहर्निशं ॥ १ ॥

पूर्णेंदुबिंबवदनां रत्नाभरणभूषितां ।
वरदाभयहस्ताभ्यं ध्यायेत् चंद्रसहोदरीं ॥ २ ॥

इच्छारूपां भगवतः सच्चिदानंदरूपिणीं ।
सर्वज्ञां सर्वजननीं विष्णुवक्षस्स्थलालयां ।
दयालुमनिशं ध्यायेत् सुखसिद्धिस्वरूपिणीं ॥ ३ ॥

अथ श्री लक्ष्मी सहस्रनाम स्तोत्रं

नित्यागताऽनंतनित्या नंदिनी जनरंजनी ।
नित्यप्रकाशिनी चैव स्वप्रकाशस्वरूपिणी ॥ १ ॥

महालक्ष्मीः महाकाळी महाकन्या सरस्वती ।
भोगवैभवसंधात्री भक्तानुग्रहकारिणी ॥ २ ॥

ईशावास्या महामाया महादेवी महेश्वरी ।
हृल्लेखा परमा शक्तिः मातृकाबीजरूपिणी ॥ ३ ॥

नित्यानंदा नित्यबोधा नादिनी जनमोदिनी ।
सत्यप्रत्ययनी चैव स्वप्रकाशात्मरूपिणी ॥ ४ ॥

त्रिपुरा भैरवी विद्या हंसा वागीश्वरी शिवा ।
वाग्देवी च महारात्रिः काळरात्रिः त्रिलोचना ॥ ५ ॥

भद्रकाळी कराळी च महाकाळी तिलोत्तमा ।
काळी कराळवक्त्रांता कामाक्षी कामदा शुभा ॥ ६ ॥

चंडिका चंडरूपेशा चामुंडा चक्रधारिणी ।
त्रैलोक्यजननी देवी त्रैलोक्यविजयोत्तमा ॥ ७ ॥

सिद्धलक्ष्मीः क्रियालक्ष्मीः मोक्षलक्ष्मीः प्रसादिनी ।
उमा भगवती दुर्गा चांद्री दाक्षायणी शिवा* ॥ ८ ॥

प्रत्यंगिरा धरा वेला लोकमाता हरिप्रिया ।
पार्वती परमा देवी ब्रह्मविद्याप्रदायिनी ॥ ९ ॥

अरूपा बहुरूपा च विरूपा विश्वरूपिणी ।
पंचभूतात्मिका वाणी पंचभूतात्मिका परा ॥ १० ॥

काळिका पंचिका वाग्मी हविः प्रत्यधिदेवता ।
देवमाता सुरेशाना वेदगर्भाऽंबिका धृतिः ॥ ११ ॥

संख्या जातिः क्रियाशक्तिः प्रकृति–र्मोहिनी मही ।
यज्ञविद्या महाविद्या गुह्यविद्या विभावरी ॥ १२ ॥

ज्योतिष्मती महामाता सर्वमंत्रफलप्रदा ।
दारिद्र्यध्वंसिनी देवी हृदयग्रंथिभेदिनी ॥ १३ ॥

सहस्रादित्यसंकाशा चंद्रिका चंद्ररूपिणी ।
गायत्री सोमसंभूतिः सावित्री प्रणवात्मिका ॥ १४ ॥

शांकरी वैष्णवी ब्राह्मी सर्वदेवनमस्कृता ।
सेव्यादुर्गा कुबेराक्षी करवीरनिवासिनी ॥ १५ ॥

जया च विजया चैव जयंती चाऽपराजिता ।

कुब्जिका काळिका शास्त्री वीणापुस्तकधारिणी ॥ १६ ॥

सर्वज्ञशक्तिः श्रीशक्तिः ब्रह्मविष्णुशिवात्मिका ।
इडापिंगळिकामध्यमृणाळीतंतुरूपिणी ॥ १७ ॥

यज्ञेशानी प्रथा दीक्षा दक्षिणा सर्वमोहिनी ।
अष्टांगयोगिनी देवी निर्बीजध्यानगोचरा ॥ १८ ॥

सर्वतीर्थस्थिता शुद्धा सर्वपर्वतवासिनी ।
वेदशास्त्रप्रभा देवी षडंगादिपदक्रम ॥ १९ ॥

शिवा धात्री शुभानंदा यज्ञकर्मस्वरूपिणी ।
व्रतिनी मेनका देवी ब्रह्माणी ब्रह्मचारिणी ॥ २० ॥

ऐकाक्षरपरा तारा भवबंधविनाशिनी ।
विश्वंभरा धराधारा निराधाराऽधिकस्वरा ॥ २१ ॥

राका कुहूरमावास्या पूर्णिमाऽनुमती द्युतिः ।
सिनीवाली शिवाऽवश्या वैश्वदेवी पिशंगिला ॥ २२ ॥

पिप्पला च विशालाक्षी रक्षोघ्नी वृष्टिकारिणी ।
दुष्टविद्राविणी देवी सर्वोपद्रवनाशिनी ॥ २३ ॥

शारदा शरसंधाना सर्वशास्त्रस्वरूपिणी ।
युद्धमध्यस्थिता देवी सर्वभूतप्रभंजनी ॥ २४ ॥

अयुद्धा युद्धरूपा च शांता शांतिस्वरूपिणी ।
गंगा सरस्वती वेणी यमुना नर्मदाऽपगा ॥ ॥ २५ ॥

समुद्रवसनावासा ब्रह्मांडश्रेणिमेखला ।
पंचवक्त्रा दशभुजा शुद्धस्फटिकसन्निभा ॥ २६ ॥

रक्ता कृष्णा सिता पीता सर्ववर्णा निरीश्वरी ।
काळिका चक्रिका देवी सत्या तु वटुका स्थिता ॥ २७ ॥

तरुणी वारुणी नारी ज्येष्ठादेवी सुरेश्वरी ।
विश्वंबरा धरा कर्त्री गळार्गळविभंजनी ॥ २८ ॥

संध्या रात्रि–र्दिवा ज्योत्स्ना कला काष्ठा निमेषिका ।
उर्वी कात्यायनी शुभ्रा संसारार्णवतारिणी ॥ २९ ॥

कपिला कीलिकाऽशोका मल्लिकानवमल्लिका ।
देविका नंदिका शांता भंजिका भयभंजिका ॥ ३० ॥

कौशिकी वैदिकी देवी सौरी रूपाधिकाऽतिभा ।
दिग्वस्त्रा नववस्त्रा च कन्यका कमलोद्भवा ॥ ३१ ॥

श्रीः स्ॐयलक्षणाऽतीतदुर्गा सूत्रप्रबोधिका ।
श्रद्धा मेधा कृतिः प्रज्ञा धारणा कांतिरेव च ॥ ३२ ॥

श्रुतिः स्मृति–र्धृति–र्धन्या भूति–रिष्टि–र्मनीषिणी ।
विरक्ति–र्व्यापिनी माया सर्वमाया प्रभंजनी ॥ ३३ ॥

महेंद्री मंत्रिणी सिंही चेंद्रजालस्वरूपिणी ।
अवस्थात्रयनिर्मुक्ता गुणत्रयविवर्जिता ॥ ३४ ॥

ईषणत्रयनिर्मुक्ता सर्वरोगविवर्जिता ।
योगिध्यानांतगम्या च योगध्यानपरायणा ॥ ३५ ॥

त्रयीशिखाविशेषज्ञा वेदांतज्ञानरूपिणी ।

भारती कमला भाषा पद्मा पद्मावती कृतिः ॥ ३६ ॥

गौतमी गोमती गौरी ईशाना हंसवाहिनी ।
नारायणी प्रभाधारा जाह्नवी शंकरात्मजा ॥ ३७ ॥

चित्रघंटा सुनंदा श्रीर्मानवी मनुसंभवा ।
स्तंभिनी क्षोभिणी मारी भ्रामिणी शत्रुमारिणी ॥ ३८ ॥

मोहिनी द्वेषिणी वीरा अघोरा रुद्ररूपिणी ।
रुद्रैकादशिनी पुण्या कळ्याणी लाभकारिणी ॥ ३९ ॥

देवदुर्गा महादुर्गा स्वप्नदुर्गाऽष्टभैरवी ।
सूर्यचंद्राग्निरूपा च ग्रहनक्षत्ररूपिणी ॥ ४० ॥

बिंदुनादकळातीता बिंदुनादकळात्मिका ।
दशवायुजयाकारा कळाषोडशसंयुता ॥ ४१ ॥

काश्यपी कमला देवी नादचक्रनिवासिनी ।
मृडाधारा स्थिरा गुह्या देविका चक्ररूपिणी ॥ ४२ ॥

अविद्या शार्वरी भुंजा जंभासुरनिबर्हिणी ।
श्रीकाया श्रीकला शुभ्रा कर्मनिर्मूलकारिणी ॥ ४३ ॥

आदिलक्ष्मी–र्गुणाधारा पंचब्रह्मात्मिका परा ।
श्रुति–र्ब्रह्ममुखावासा सर्वसंपत्तिरूपिणी ॥ ४४ ॥

मृतसंजीविनी मैत्री कामिनी कामवर्जिता ।
निर्वाणमार्गदा दॆवी हंसिनी काशिका क्षमा ॥ ४५ ॥

सपर्या गुणिनी भिन्ना निर्गुणाऽखंडिता शुभा ।
स्वामिनी वॆदिनी शक्या शांबरी चक्रधारिणी ॥ ४६ ॥

दंडिनी मुंडिनी व्याघ्री शिखिनी सॊमसंहतिः ।
चिंतामणि–श्चिदानंदा पंचबाणप्रबॊधिनी ॥ ४७ ॥

बाणश्रॆणिः सहस्राक्षी सहस्रभुजपादुका ।
संध्याबलि–स्त्रिसंध्याख्या ब्रह्मांडमणिभूषणा ॥ ४८ ॥

वासवी वारुणीसॆना कुलिका मंत्ररंजनी ।
जितप्राणस्वरूपा च कांता काम्यवरप्रदा ॥ ४९ ॥

मंत्रब्रह्मणविद्यार्था नादरूपा हविष्मती ।
अथर्वणीश्रुतिः शून्या कल्पनावर्जिता सती ॥ ५० ॥

सत्ताजातिः प्रमाऽमेयाऽप्रमितिः प्राणदा गतिः ।
अवर्णा पंचवर्णा च सर्वदा भुवनेश्वरी ॥ ५१ ॥

त्रैलोक्यमोहिनी विद्या सर्वभर्त्री क्षराऽक्षरा ।
हिरण्यवर्णा हरिणी सर्वोपद्रवनाशिनी ॥ ५२ ॥

कैवल्यपदवीरेखा सूर्यमंडलसंस्थिता ।
सोममंडलमध्यस्था वह्निमंडलसंस्थिता ॥ ५३ ॥

वायुमंडलमध्यस्था व्योममंडलसंस्थिता ।
चक्रिका चक्रमध्यस्था चक्रमार्गप्रवर्तिनी ॥ ५४ ॥

कोकिलाकुलचक्रेशा पक्षतिः पंक्तिपावनी ।
सर्वसिद्धांतमार्गस्था षड्वर्णा वरवर्जिता ॥ ५५ ॥

शतरुद्रहरा हंत्री सर्वसंहारकारिणी ।

पुरुषा पौरुषी तुष्टिः सर्वतंत्रप्रसूतिका ॥ ५६ ॥

अर्धनारीश्वरी देवी सर्वविद्याप्रदायिनी ।
भार्गवी भूजुषीविद्या सर्वोपनिषदास्थिता ॥ ५७ ॥

व्योमकेशाऽखिलप्राणा पंचकोशविलक्षणा ।
पंचकोशात्मिका प्रत्यक्पंचब्रह्मात्मिका शिवा ॥ ५८ ॥

जगज्जराजनित्री च पंचकर्मप्रसूतिका ।
वाग्देव्याभरणाकारा सर्वकाम्यस्थिता स्थिति ॥ ५९ ॥

अष्टादशचतुष्षष्टिपीठिका विद्ययायुता ।
काळिकाऽकर्षणी श्यामा यक्षिणी किन्नरेश्वरी ॥ ६० ॥

केतकी मल्लिकाऽशोका वाराही धरणी ध्रुवा ।
नारसिंही महोग्रास्या भक्तानामार्तिनाशिनी ॥ ६१ ॥

अंतर्बला स्थिरा लक्ष्मीः जरामरणनाशिनी ।
श्रीरंजिता महाकाया सोमसूर्याग्निलोचना ॥ ६२ ॥

अदितिर्देवमाता च अष्टपुत्राऽष्टयोगिनी ।
अष्टप्रकृति–रष्टाष्टविभ्राजद्विकृताकृतिः ॥ ६३ ॥

दुर्भिक्षध्वंसिनी देवी सीता सत्या च रुक्मिणी ।
ख्यातिजा भार्गवी देवी देवयोनिस्तपस्विनी ॥ ६४ ॥

शाकंभरी महाशोणा गरुडोपरिसंस्थिता ।
सिंहगा व्याघ्रगा देवी वायुगा च महाद्रिगा ॥ ६५ ॥

अकारादिक्षकारांता सर्वविद्याधिदेवता ।
मंत्रव्याख्याननिपुणा ज्योतिश्शास्त्रैकलोचना ॥ ६६ ॥

इडापिंगळिकामध्यासुषुम्नाग्रंथिभेदिनी ।
कालचक्राश्रयोपेता कालचक्रस्वरूपिणी ॥ ६७ ॥

वैशारदी मतिश्रेष्ठा वरिष्ठा सर्वदीपिका ।
वैनायकी वरारोहा श्रोणिवेला बहिर्वलिः ॥ ६८ ॥

जंभिनी जृंभिणी जंभकारिणी गणकारिका ।
शरणी चक्रिकाऽनंता सर्वव्याधिचिकित्सकी ॥ ६९ ॥

देवकी देवसंकाशा वारिधिः करुणाकरा ।
शर्वरी सर्वसंपन्ना सर्वपापप्रभंजनी ॥ ७० ॥

ऐकमात्रा द्विमात्रा च त्रिमात्रा च तथाऽपरा ।
अर्थमात्रा परा सूक्ष्मा सूक्ष्मार्थार्थपराऽपरा ॥ ७१ ॥

ऐकवीरा विशेषाख्या षष्ठी देवी मनस्विनी ।
नैष्कर्म्या निष्कलालोका ज्ञानकर्माधिका गुणा ॥ ७२ ॥

सबंध्वानंदसंदोहा व्योमाकाराऽनिरूपिता ।
गद्यपद्यात्मिका वाणी सर्वालंकारसंयुता ॥ ७३ ॥

साधुबंधपदन्यासा सर्वौको घटिकावलिः ।
षट्कर्मा कर्कशाकारा सर्वकर्मविवर्जिता ॥ ७४ ॥

आदित्यवर्णा चाऽपर्णा कामिनी वररूपिणी ।
ब्रह्माणी ब्रह्मसंताना वेदवागीश्वरी शिवा ॥ ७५ ॥

पुराणन्यायमीमांसाधर्मशास्त्रागमश्रुता ।

सद्योवेदवती सर्वा हंसी विद्याधिदेवता ॥ ७६ ॥

विश्वेश्वरी जगद्धात्री विश्वनिर्माणकारिणी ।
वैदिकी वेदरूपा च कालिका कालरूपिणी ॥ ७७ ॥

नारायणी महादेवी सर्वतत्त्वप्रवर्तिनी ।
हिरण्यवर्णरूपा च हिरण्यपदसंभवा ॥ ७८ ॥

कैवल्यपदवी पुण्या कैवल्यज्ञानलक्षिता ।
ब्रह्मसंपत्तिरूपा च ब्रह्मसंपत्तिकारिणी ॥ ७९ ॥

वारुणी वारुणाराध्या सर्वकर्मप्रवर्तिनी ।
ऐकाक्षरपराऽऽयुक्ता सर्वदारिद्र्यभंजिनी ॥ ८० ॥

पाशांकुशान्विता दिव्या वीणाव्याख्याक्षसूत्रभृत् ।
ऐकमूर्तिः त्रयीमूर्तिः मधुकैटभभंजनी ॥ ८१ ॥

सांख्या सांख्यवती ज्वाला ज्वलंती कामरूपिणी ।
जाग्रती* सर्वसंपत्तिः सुषुप्ता स्वेष्टदायिनी ॥ ८२ ॥

कपालिनी महादंष्ट्रा भ्रुकुटीकुटिलानना ।
सर्वावासा सुवासा च बृहत्यष्टिश्च शक्वरी ॥ ८३ ॥

छंदोगणप्रतिष्ठा च कल्माषी करुणात्मिका ।
चक्षुष्मती महाघोषा खड्गचर्मधराऽशनि ॥ ८४ ॥

शिल्पवैचित्र्यविद्योता सर्वतोभद्रवासिनी ।
अचिंत्यलक्षणाकारा सूत्रभाष्यनिबंधना ॥ ८५ ॥

सर्ववेदार्थसंपत्तिः सर्वशास्त्रार्थमातृका ।
अकारादिक्षकारांतसर्ववर्णकृतस्थला ॥ ८६ ॥

सर्वलक्ष्मीः सदानंदा सारविद्या सदाशिवा ।
सर्वज्ञा सर्वशक्तिश्च खेचरीरूपगोच्छ्रिता ॥ ८७ ॥

अणिमादिगुणोपेता परा काष्ठा परागतिः ।
हंसयुक्तविमानस्था हंसारूडा शशिप्रभा ॥ ८८ ॥

भवानी वासनाशक्तिः आकृतिस्था खिलाऽखिला ।
तंत्रहेतु–र्विचित्रांगी व्योमगंगाविनोदिनी ॥ ८९ ॥

वर्षा च वार्षिका चैव ऋग्यजुस्सामरूपिणी ।
महानदी नदीपुण्याऽगण्यपुण्यगुणक्रिया ॥ ९० ॥

समाधिगतलभ्याऽर्था श्रोतव्या स्वप्रिया घृणा ।
नामाक्षरपरा देवी उपसर्गनखांचिता ॥ ९१ ॥

निपातोरुद्वयीजंघा मातृका मंत्ररूपिणी ।
आसीना च शयाना च तिष्ठंती धावनाधिका ॥ ९२ ॥

लक्ष्यलक्षणयोगाढ्या ताद्रूप्यगणनाकृतिः ।
सैकरूपा नैकरूपा सेंदुरूपा तदाकृतिः ॥ ९३ ॥

समासतद्धिताकारा विभक्तिवचनात्मिका ।
स्वाहाकारा स्वधाकारा श्रीपत्यर्धांगनंदिनी ॥ ९४ ॥

गंभीरा गहना गुह्या योनिलिंगार्धधारिणी ।
शेषवासुकिसंसेव्या चपला वरवर्णिनी ॥ ९५ ॥

कारुण्याकारसंपत्तिः कीलकृन्मंत्रकीलिका ।

शक्तिबीजात्मिका सर्वमंत्रेष्टाऽक्षयकामना ॥ ९६ ॥

आग्नेयी पार्थिवा आप्या वायव्या व्योमकेतना ।
सत्यज्ञानात्मिकाऽऽनंदा ब्राह्मी ब्रह्म सनातनी ॥ ९७ ॥

अविद्यावासना माया प्रकृतिः सर्वमोहिनी ।
शक्तिः धारणशक्तिश्च चिदचिच्छक्ति योगिनी ॥ ९८ ॥

वक्त्राऽरुणा महामाया मरीचिर्मदमर्दिनी ।
विराट् स्वाहा स्वधा शुद्धा नीरूपास्तिः सुभक्तिगा ॥ ९९ ॥

निरूपितद्वयीविद्या नित्यानित्यस्वरूपिणी ।
वैराजमार्गसंचारा सर्वसत्पथदर्शिनी ॥ १०० ॥

जालंधरी मृडानी च भवानी भवभंजनी ।
त्रैकालिकज्ञानतंतुः त्रिकालज्ञानदायिनी ॥ १०१ ॥

नादातीता स्मृतिः प्रज्ञा धात्रीरूपा त्रिपुष्करा ।
पराजिता विधानज्ञा विशिषितगुणात्मिका ॥ १०२ ॥

हिरण्यकेशिनी हेमब्रह्मसूत्रविचक्षणा ।
असंख्येयपरार्धांतस्वरव्यंजनवैखरी ॥ १०३ ॥

मधुजिह्वा मधुमती मधुमासोदया मधुः ।
माधवी च महाभागा मेघगंभीरनिस्वना ॥ १०४ ॥

ब्रह्मविष्णुमहेशादिज्ञातव्यार्थविशेषगा ।
नाभौवह्निशिखाकारा ललाटेचंद्रसन्निभा ॥ १०५ ॥

भ्रूमध्येभास्कराकारा सर्वताराकृतिर्हृदि ।
कृत्तिकादिभरण्यंतनक्षत्रेष्ट्यर्चितोदया ॥ १०६ ॥

ग्रहविद्यात्मिका ज्योतिर् ज्योतिर्विन्मतिजीविका ।
ब्रह्मांडगर्भिणी बाला सप्तावरणदेवता ॥ १०७ ॥

वैराजोत्तमसाम्राज्या कुमारकुशलोदया ।
बगला भ्रमरांबा च शिवदूती शिवात्मिका ॥ १०८ ॥

मेरुविंध्याधिसंस्थाना काश्मीरपुरवासिनी ।
योगनिद्रा महानिद्रा विनिद्रा राक्षसाश्रिता ॥ १०९ ॥

सुवर्णदा महागंगा पंचाख्या पंचसंहतिः ।
सुप्रजाता सुवीरा च सुपोषा सुपतिः शिवा ॥ ११० ॥

सुगृहा रक्तबीजांता हतकंदर्पजीविका ।
समुद्रव्योममध्यस्था समबिंदुसमाश्रया ॥ १११ ॥

सौभाग्यरसजीवातुः सारासारविवेकदृक् ।
त्रिवल्यादिसुपुष्टांगा भारती भरताश्रिता ॥ ११२ ॥

नादब्रह्ममयीविद्या ज्ञानब्रह्ममयीपरा ।
ब्रह्मनाडी निरुक्तिश्च ब्रह्मकैवल्यसाधना ॥ ११३ ॥

कालिकेयमहोदारवीर्यविक्रमरूपिणी ।
बडबाग्निशिखावक्त्रा महाकबलतर्पणा ॥ ११४ ॥

महाभूता महादर्पा महासारा महाक्रतुः ।
पंचभूतमहाग्रासा पंचभूतादिदेवता ॥ ११५ ॥

सर्वप्रमाणा संपत्तिः सर्वरोगप्रतिक्रिया ।

ब्रह्मांडांतर्बहिर्व्याप्ता विष्णुवक्षोविभूषिणी ॥ ११६ ॥

शांकरी विधिवक्त्रस्था प्रवरा वरहेतुकी ।
हेममाला शिखामाला त्रिशिखा पंचलोचना ॥ ११७ ॥

सर्वागमसदाचारमर्यादा यातुभंजनी ।
पुण्यश्लोकप्रबंधाढ्या सर्वांतर्यामिरूपिणी ॥ ११८ ॥

सामगानसमाराध्या श्रोत्रुकर्णरसायना ।
जीवलोकैकजीवातु-र्भद्रोदारविलोकना ॥ ११९ ॥

तडित्कोटिलसत्कांतिः तरुणी हरिसुंदरी ।
मीननेत्रा च सेंद्राक्षी विशालाक्षी सुमंगळा ॥ १२० ॥

सर्वमंगळसंपन्ना साक्षान्मंगळदेवता ।
देहहृद्दीपिका दीप्तिः जिह्वपापप्रणाशिनी ॥ १२१ ॥

अर्थचंद्रोल्लसद्दंष्ट्रा यज्ञवाटीविलासिनी ।
महादुर्गा महोत्साहा महादेवबलोदया ॥ १२२ ॥

डाकिनीड्या शाकिनीड्या साकिनीड्या समस्तजुट् ।
निरंकुशा नाकिवंद्या षडाधाराधिदेवता ॥ १२३ ॥

भुवनज्ञाननिश्श्रेणी भुवनाकारवल्लरी ।
शाश्वती शाश्वताकारा लोकानुग्रहकारिणी ॥ १२४ ॥

सारसी मानसी हंसी हंसलोकप्रदायिनी ।
चिन्मुद्रालंकृतकरा कोटिसूर्यसमप्रभा ॥ १२५ ॥

सुखप्राणिशिरोरेखा सददृष्टप्रदायिनी ।
सर्वसांकर्यदोषघ्नी ग्रहोपद्रवनाशिनी ॥ १२६ ॥

क्षुद्रजंतुभयघ्नी च विषरोगादिभंजनी ।
सदाशांता सदाशुद्धा गृहच्छिद्रनिवारिणी ॥ १२७ ॥

कलिदोषप्रशमनी कोलाहलपुरस्थिता ।
गौरी लाक्षणिकी मुख्या जघन्याकृतिवर्जिता ॥ १२८ ॥

माया विद्या मूलभूता वासवी विष्णुचेतना ।
वादिनी वसुरूपा च वसुरत्नपरिच्छदा ॥ १२९ ॥

छांदसी चंद्रहृदया मंत्रस्वच्छंदभैरवी ।
वनमाला वैजयंती पंचदिव्यायुधात्मिका ॥ १३० ॥

पीतांबरमयी चंचत्कौस्तुभा हरिकामिनी ।
नित्या तथ्या रमा रामा रमणी मृत्युभंजनी ॥ १३१ ॥

ज्येष्ठा काष्ठा धनिष्ठांता शरांगी निर्गुणप्रिया ।
मैत्रेया मित्रविंदा च शेष्यशेषकलाशया ॥ १३२ ॥

वाराणसीवासलभ्या आर्यावर्तजनस्तुता ।
जगदुत्पत्तिसंस्थानसंहारत्रयकारणा ॥ १३३ ॥

त्वमंब विष्णुसर्वस्वं नमस्तेऽस्तु महेश्वरि ।
नमस्ते सर्वलोकानांजनन्यै पुण्यमूर्तये ॥ १३४ ॥

सिद्धलक्ष्मीः महाकाळी महालक्ष्मी नमोऽस्तुते ।
सद्योजातादिपंचाग्निरूपा पंचकपंचका ॥ १३५ ॥

यंत्रलक्ष्मीः भवत्याऽदिः आद्याद्ये ते नमो नमः ।

सृष्ट्यादिकारणाकारवितते दोषवर्जिते ॥ १३६ ॥

जगल्लक्ष्मीः जगन्मातः विष्णुपत्नि नमोऽस्तुते ।
नवकोटिमहाशक्तिसमुपास्यपदांबुजे ॥ १३७ ॥

कनत्सौवर्णरत्नाढ्ये सर्वाभरणभूषिते ।
अनंतानित्यमहिषि प्रपंचेश्वरनायकि ॥ १३८ ॥

अत्युच्छ्रितपदांतस्स्थे परमव्योमनायकी ।
नाकपृष्ठगताराध्ये विष्णुलोकविलासिनि ॥ १३९ ॥

वैकुंठराजमहिषी श्रीरंगनगराश्रिते ।
रंगनायकी भूपुत्री कृष्णे वरदवल्लभे ॥ १४० ॥

कोटिब्रह्मादिसंसेव्ये कोटिरुद्रादिकीर्तिते ।
मातुलुंगमयंखेटं सौवर्णचषकं तथा ॥ १४१ ॥

पद्मद्वयं पूर्णकुंभं कीरं च वरदाभये ।
पाशमंकुशकं शंखं चक्रं शूलं कृपाणिकां ॥ १४२ ॥

धनुर्बाणौ चाक्षमालां चिन्मुद्रामपि बिभ्रती ।
अष्टादशभुजे लक्ष्मीः महाष्टादशपीठगे ॥ १४३ ॥

भूमिनीलादिसंसेव्ये स्वामिचित्तानुवर्तिनि ।
पद्मे पद्मालये पद्मि पूर्णकुंभाभिषेचिते ॥ १४४ ॥

इंदिरेंदिंदिराभाक्षि क्षीरसागरकन्यके ।
भार्गवी त्वं स्वतंत्रेच्छा वशीकृतजगत्पतिः ॥ १४५ ॥

मंगळंमंगळानां त्वं देवतानां च देवता ।
त्वमुत्तमोत्तमानां च त्वं श्रेयः परमामृतं ॥ १४६ ॥

धनधान्याभिवृद्धिश्च सार्वभ्ॐअसुखोच्छ्रया ।
आंदोलिकादिसौभाग्यं मत्तेभादिमहोदया ॥ १४७ ॥

पुत्रपौत्राभिवृद्धिश्च विद्याभोगबलादिकं ।
आयुरारोग्यसंपत्तिरष्टैश्वर्यं त्वमेव हि ॥ १४८ ॥

परमेशविभूतिश्च सूक्ष्मात्सूक्ष्मतरागतिः ।
सदयापांगसंदत्तब्रह्मेंद्रादिपदस्थितिः ॥ १४९ ॥

अव्याहतमहाभाग्यं त्वमेवाक्षोभ्यविक्रमः ।
समन्वयश्चवेदानां अविरोधस्त्वमेव हि ॥ १५० ॥

निःश्रेयसपदप्राप्तिसाधनं फलमेव च ।
श्रीमंत्रराजराज्ञी च श्रीविद्या क्षेमकारिणी ॥ १५१ ॥

श्रीं–बीजजपसंतुष्टा ऐं–ह्रीं–श्रीं–बीजपालिका ।
प्रपत्तिमार्गसुलभा विष्णुप्रथमकिंकरी ॥ १५२ ॥

क्लींकारार्थसावित्री च स्ॐअंगळ्याधिदेवता ।
श्रीषोडशाक्षरीविद्या श्रीयंत्रपुरवासिनी ॥ १५३ ॥

सर्वमंगळमांगळ्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यंबके गौरी नारायणी नमोऽस्तुते ।
पुनः पुनर्नमस्तेऽस्तु साष्टांगमयुतं पुनः ॥ १५४ ॥

सनत्कुमार उवाच–
ऐवां स्तुता महालक्ष्मीर्ब्रह्मरुद्रादिभिः सुरैः ।
नमद्भिरार्तैर्दीनैश्च निस्स्वत्वैर्भोगवर्जितैः ॥ १५५ ॥

ज्येष्ठाजुष्टैश्च निःश्रीकैः संसारा स्वपरायणैः ।
विष्णुपत्नी ददौ तेषां दर्शनं दृष्टि तर्पणं ॥ १५६ ॥

शरत्पूर्णेंदुकोट्याभधवळापांग वीक्षणैः ।
सर्वान् सत्त्व समाविष्टान्चक्रे हृष्टा वरं ददौ ॥ १५७ ॥

महालक्ष्मीरुवाच–
नाम्नां साष्ट सहस्रं मे प्रमादाद्वापि यः सकृत् ।
कीर्तयेत्तत्कुले सत्यं वसाम्याचंद्रतारकं ॥ १५८ ॥

किं पुनर्नियमाज्जप्तुर्मदेकशरणस्य च ।
मातृवत्सानुकंपाहं पोषकी स्यामहर्निशं ॥ १५९ ॥

मन्नाम स्तवतां लोके दुर्लभं नास्ति चिंतितं ।
मत्प्रसादेन सर्वेऽपि स्वस्वेष्टार्थमवाप्स्यथ ॥ १६० ॥

लुप्त वैष्णव धर्मस्य मद्व्रतेष्ववकीर्णिनः ।
भक्ति प्रपत्ति हीनस्य वंद्यो नाम्नां स्तवोऽपि मे ॥ १६१ ॥

तस्मादवश्यं तैः दोषैर्विहीनः पापवर्जितः ।
जपेत् साष्ट सहस्रं मे नाम्नां प्रत्यहमादरात् ॥ १६२ ॥

साक्षादलक्ष्मी पुत्रोऽपि दुर्भाग्योऽप्यलसोऽपि वा ।
अप्रयत्नोऽपि मूढोऽपि विकलः पतितोऽपि च ॥ १६३ ॥

अवश्यं प्राप्नुयाद् भाग्यं मत्प्रसादेन केवलं ।
स्पृहेयमचिराद्देवा वरदानाय जापिनः ।
ददामि सर्वमिष्टार्थं लक्ष्मीति स्मरतां ध्रुवं ॥ १६४ ॥

सनत्कुमार उवाच–
इत्युक्त्वांतर्दधे लक्ष्मीः वैष्णवी भगवत्कला ।
इष्टा पूर्तं च सुकृतं भागधेयं च चिंतितं ॥ १६५ ॥

स्वं स्वं स्थानं च भोगं च विजयं लेभिरे सुराः ।
तदेतत् प्रवदाम्यद्य लक्ष्मी नाम सहस्रकं ।
योगिनः पठति क्षिप्रं चिंतितार्थानवाप्स्यथ ॥ १६६ ॥

गार्ग्य उवाच–
सनत्कुमार योगींद्र इत्युक्त्वा स दया निधिः ।

अनुगृह्य ययौ क्षिप्रं तांश्च द्वादश योगिनः ॥ १६७ ॥

तस्मादेतद्रहस्यं च गोप्यं जप्यं प्रयत्नतः ।
अष्टम्यां च चतुर्दश्यां नवाम्यां भृगुवासरे ॥ १६८ ॥

पौर्णमास्यां अमायां च पर्वकाले विशेषतः ।
जपेद्वा नित्य कार्येषु सर्वान्कामानवाप्नुयात् ॥ १६९ ॥

इति श्री स्कंदपुराणे सनत्कुमार संहितायां
श्री लक्ष्मी सहस्रनामस्तोत्रं संपूर्णं ॥

## श्री रुद्रप्रश्नः – लघुन्यासः

ॐ अथात्मानगं शिवात्मानग् श्रीरुद्ररूपं ध्यायेत् ॥

शुद्धस्फटिकसंकाशं त्रिनेत्रं पञ्चवक्त्रकम् ।
गङ्गाधरं दशभुजं सर्वाभरणभूषितम् ॥

नीलग्रीवं शशाङ्काङ्कं नागयज्ञोपवीतिनम् ।
व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदम् ॥

कमण्डल्वक्षसूत्राणां धारिणं शूलपाणिनम् ।
ज्वलन्तं पिङ्गलजटाशिखामुद्योतधारिणम् ॥

वृषस्कन्धसमारूढम् उमादेहार्धधारिणम् ।
अमृतेनाप्लुतं शान्तं दिव्यभोगसमन्वितम् ॥

दिग्देवतासमायुक्तं सुरासुरनमस्कृतम् ।
नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम् ॥

सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपिणम् ।

ऐवं ध्यात्वा द्विजसम्यक् ततो यजनमारभेत् ॥

ॐ प्रजनने ब्रह्मा तिष्ठतु ।
पादयोर्विष्णुस्तिष्ठतु ।
हस्तयोर्हरस्तिष्ठतु ।
बाह्वोरिन्द्रस्तिष्ठतु ।
जठरेऽग्निस्तिष्ठतु ।
हृदये शिवस्तिष्ठतु ।
कण्ठे वसवस्तिष्ठन्तु ।
वक्त्रे सरस्वती तिष्ठतु ।
नासिकयोर्वायुस्तिष्ठतु ।
नयनयोश्चन्द्रादित्यौ तिष्ठेताम् ।
कर्णयोरश्विनौ तिष्ठेताम् ।
ललाटे रुद्रास्तिष्ठन्तु ।
मूर्ध्न्यादित्यास्तिष्ठन्तु ।
शिरसि महादेवस्तिष्ठतु ।
शिखायां वामदेवस्तिष्ठतु ।
पृष्ठे पिनाकी तिष्ठतु ।
पुरतः शूली तिष्ठतु ।
पार्श्वयोः शिवाशङ्करौ तिष्ठेताम् ।

सर्वतो वायुस्तिष्ठतु ।
ततो बहिः सर्वतोऽग्निर्ज्वालामाला परिवृतस्तिष्ठतु ।
सर्वेष्वङ्गेषु सर्वा देवता यथास्थानं तिष्ठन्तु ।
माग्ं रक्षन्तु । सर्वान् महाजनान् रक्षन्तु ॥

ॐ अग्निर्मे वाचि श्रितः । वाग्धृदये ।
हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

वायुर्मे प्राणे श्रितः । प्राणो हृदये ।
हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

सूर्यो मे चक्षुषि श्रितः । चक्षुर्हृदये ।
हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

चन्द्रमा मे मनसि श्रितः । मनो हृदये ।
हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

दिशो मे श्रोत्रे श्रिताः । श्रोत्रग्ं हृदये ।
हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

आपो मे रेतसि श्रिताः । रेतो हृदये ।
हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

पृथिवी मे शरीरे श्रिताः । शरीरग्ं हृदये ।
हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

ओषधिवनस्पतयो मे लोमसु श्रिताः । लोमानि हृदये ।
हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

इन्द्रो मे बले श्रितः । बलग्ं हृदये ।
हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

पर्जन्यो मे मूर्ध्नि श्रितः । मूर्धा हृदये ।
हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

ईशानो मे मन्यौ श्रितः । मन्युर्हृदये ।
हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

आत्मा म आत्मनि श्रितः । आत्मा हृदये ।
हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

पुनर्म आत्मा पुनरायुरागात् । पुनः प्राणः पुनराकूतमागात्
।

वैश्वानरो रश्मिभिर्वावृधानः । अन्तस्तिष्ठत्वमृतस्य गोपाः ॥

अस्य श्री रुद्राध्याय प्रश्न महामन्त्रस्य अघोर ऋषिः, अनुष्टुप् छन्दः, सङ्कर्षणमूर्तिस्वरूपो योऽसावादित्यः परमपुरुषः स ऐष रुद्रो देवता । नमः शिवायेति बीजम् । शिवतरायेति शक्तिः । महादेवायेति कीलकम् । श्री सांबसदाशिव प्रसाद सिद्ध्यर्थे जपे विनियोगः ॥

ॐ अग्निहोत्रात्मने अङ्गुष्ठाभ्यां नमः ।
दर्शपूर्णमासात्मने तर्जनीभ्यां नमः ।
चातुर्मास्यात्मने मध्यमाभ्यां नमः ।
निरूढपशुबन्धात्मने अनामिकाभ्यां नमः ।
ज्योतिष्टोमात्मने कनिष्ठिकाभ्यां नमः ।
सर्वक्रत्वात्मने करतलकरपृष्ठाभ्यां नमः ।

अग्निहोत्रात्मने हृदयाय नमः ।
दर्शपूर्णमासात्मने शिरसे स्वाहा ।
चातुर्मास्यात्मने शिखायै वषट् ।
निरूढपशुबन्धात्मने कवचाय हुम् ।
ज्योतिष्टोमात्मने नेत्रत्रयाय वौषट् ।
सर्वक्रत्वात्मने अस्त्राय फट् ।
भूर्भुवस्सुवरोमिति दिग्बन्धः ।

ध्यानम् ॥

आपाताळनभः स्थलान्तभुवनब्रह्माण्डमाविस्फुर–
ज्ज्योतिः स्फाटिकलिङ्गमौळिविलसत्पूर्णेन्दुवान्तामृतैः ।
अस्तोकाप्लुतमेकमीशमनिशं रुद्रानुवाकाञ्जपन्
ध्यायेदीप्सितसिद्धये ध्रुवपदं विप्रोऽभिषिञ्चेच्छिवम् ॥

ब्रह्माण्डव्याप्तदेहा भसितहिमरुचा भासमाना भुजङ्गैः
कण्ठे कालाः कपर्दाकलित शशिकलाश्चण्डकोदण्ड
हस्ताः ॥
त्र्यक्षा रुद्राक्षमालाः प्रकटितविभवाः शांभवा मूर्तिभेदा
रुद्राः श्रीरुद्रसूक्तप्रकटितविभवा नः प्रयच्छन्तु सौख्यम् ॥

ॐ गणानां त्वा गणपतिग् हवामहे कविं
कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिस्सीद
सादनम् ॥

महागणपतये नमः ॥

ॐ शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च
मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे
भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे
धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च
मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं
च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च
मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च
मे ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

## श्री रुद्रप्रश्नः – नमकप्रश्नः

ॐ नमो भगवते रुद्राय ॥

ॐ नमस्ते रुद्र मन्यव उतोत इषवे नमः । नमस्ते अस्तु
धन्वने बाहुभ्यामुत ते नमः । या त इषुः शिवतमा शिवं बभूव
ते धनुः । शिवा शरव्या या तव तया नो रुद्र मृडय । या ते
रुद्र शिवा तनूरघोराऽपापकाशिनी । तया नस्तनुवा शन्तमया
गिरिशन्ताभिचाकशीहि । यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे ।
शिवां गिरित्र तां कुरु मा हिग्ंसीः पुरुषं जगत् । शिवेन
वचसा त्वा गिरिशाच्छावदामसि । यथा नः
सर्वमिज्जगदयक्ष्मग्ं सुमना असत् । अध्यवोचदधिवक्ता प्रथमो
दैव्यो भिषक् । अहीग्ंश्च सर्वाञ्जंभयन्त्सर्वाश्च यातुधान्यः ।
असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः । ये चेमाग्ं रुद्रा
अभितो दिक्षु श्रिताः सहस्रशोऽवैषाग्ं हेड ईमहे । असौ
योऽवसर्पति नीलग्रीवो विलोहितः । उतैनं गोपा
अदृशन्नदृशन्नुदहार्यः । उतैनं विश्वा भूतानि स दृष्टो मृडयाति

नः । नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे । अथो ये
अस्य सत्त्वानोऽहं तेभ्योऽकरन्नमः । प्रमुञ्च
धन्वनस्त्वमुभयोरार्त्नियोर्ज्याम् । याश्च ते हस्त इषवः परा ता
भगवो वप । अवतत्य धनुस्त्वग्ं सहस्राक्ष शतेषुधे । निशीर्य
शल्यानां मुखा शिवो नः सुमना भव । विज्यं धनुः कपर्दिनो
विशल्यो बाणवाग्ं उत । अनेशन्नस्येषव आभुरस्य निषंगथिः ।
या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः । तयाऽस्मान्,
विश्वतस्त्वमयक्ष्मया परिब्भुज । नमस्ते अस्त्वायुधायानातताय
धृष्णवे । उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने । परिते
धन्वनो हेतिरस्मान्वृणक्तु विश्वतः । अथो य इषुधिस्तवारे
अस्मन्निधेहि तम् ॥ नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय
त्र्यंबकाय त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय
नीलकण्ठाय मृत्युञ्जयाय सर्वेश्वराय सदाशिवाय
श्रीमन्महादेवाय नमः ॥ १ ॥
नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो

हरिकेशेभ्यः पशूनां पतये नमो नमः सस्पिञ्जराय त्विषीमते
पथीनां पतये नमो नमो बभ्लुशाय विव्याधिनेऽन्नानां पतये
नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो नमो भवस्य
हेत्यै जगतां पतये नमो नमो रुद्रायातताविने क्षेत्राणां पतये
नमो नमः सूतायाहन्त्याय वनानां पतये नमो नमो रोहिताय
स्थपतये वृक्षाणां पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणां
पतये नमो नमो भुवंतये वारिवस्कृतायौषधीनां पतये नमो नम
उच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमो नमः कृत्स्नवीताय
धावते सत्त्वनां पतये नमः ॥ २ ॥

नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो नमः
ककुभाय निषङ्गिणे स्तेनानां पतये नमो नमो निषङ्गिण
इषुधिमते तस्कराणां पतये नमो नमो वञ्चते परिवञ्चते
स्तायूनां पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमो
नमः सृकाविभ्यो जिघाग्ंसद्भ्यो मुष्णतां पतये नमो नमो
ऽसिमद्भ्यो नक्तञ्चरद्भ्यः प्रकृन्तानां पतये नमो नम

उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो नम इषुमद्भ्यो
धन्वाविभ्यश्च वो नमो नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो
नमो नम आयच्छद्भ्यो विसृजद्भ्यश्च वो नमो नमो
ऽस्यद्भ्यो विध्यद्भ्यश्च वो नमो नम आसीनेभ्यः शयानेभ्यश्च
वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नम स्तिष्ठद्भ्यो
धावद्भ्यश्च वो नमो नमः सभाभ्यः सभापतिभ्यश्च वो नमो
नमो अश्वेभ्योऽश्वपतिभ्यश्च वो नमः ॥ ३ ॥

नम आव्यधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम
उगणाभ्यस्तृग्ंहतीभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च
वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गणेभ्यो
गणपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो
नमो महद्भ्यः, क्षुल्लकेभ्यश्च वो नमो नमो रथिभ्योऽरथेभ्यश्च
वो नमो नमो रथेभ्यो रथपतिभ्यश्च वो नमो नमः सेनाभ्यः
सेनानिभ्यश्च वो नमो नमः, क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो
नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः

कर्मारिभ्यश्च वो नमो नमः पुञ्जिष्टेभ्यो निषादेभ्यश्च वो नमो
नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो नमो मृगयुभ्यः
श्वनिभ्यश्च वो नमो नमः श्वभ्यः श्वपतिभ्यश्च वो नमः ॥ ४ ॥
नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो
नीलग्रीवाय च शितिकण्ठाय च नमः कपर्दिने च व्युप्तकेशाय
च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशाय च
शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च नमो ह्रस्वाय च
वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च
संवृध्वने च नमो अग्रियाय च प्रथमाय च नम आशवे
चाजिराय च नमः शीघ्रियाय च शीभ्याय च नम ऊर्म्याय
चावस्वन्याय च नमः स्रोतस्याय च द्वीप्याय च ॥ ५ ॥
नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च
नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्नियाय च
नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च
नम उर्वर्याय च खल्याय च नमः श्लोक्याय चाऽवसान्याय च

∪ I ∪ I ∪ I ∪ I ∪ I ∪ I
नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च नम
∪ I ∪ I ∪ ∪ I ∪ ∪ I
आशुषेणाय चाशुरथाय च नमः शूराय चावभिन्दते च नमो
∪ I ∪ I ∪ I ∪ I ∪ I ∪ I
वर्मिणे च वरूथिने च नमो बिल्मिने च कवचिने च नमः
∪ I ∪ I
श्रुताय च श्रुतसेनाय च ॥ ६ ॥
I ∪ I ∪ I ∪ I ∪ I ∪ I ∪
नमो दुन्दुभ्याय चाहनन्याय च नमो धृष्णवे च प्रमृशाय च
I ∪ I ∪ I ∪ I ∪ I ∪ I ∪
नमो दूताय च प्रहिताय च नमो निषङ्गिणे चेषुधिमते च
I ∪ I ∪ I ∪ I ∪ I ∪ I ∪
नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च
∪ I ∪ I ∪ I ∪ I ∪ I ∪ ∪
नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः
I ∪ I ∪ I ∪ I ∪ I ∪ ∪
सूद्याय च सरस्याय च नमो नाद्याय च वैशन्ताय च नमः
I ∪ I ∪ ∪ I ∪ I ∪ I ∪ I
कूप्याय चावट्याय च नमो वर्ष्याय चावर्ष्याय च नमो मेघ्याय
∪ I ∪ I ∪ I ∪ I ∪ ∪ I ∪
च विद्युत्याय च नम ईध्रियाय चातप्याय च नमो वात्याय च
I ∪ I ∪ I ∪ I
रेष्मियाय च नमो वास्तव्याय च वास्तु पाय च ॥ ७ ॥ ॥
∪ I ∪ I ∪ I ∪ I ∪ I ∪ I
नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च नमः
∪ I ∪ I ∪ I ∪ I ∪ I ∪ I
शङ्गाय च पशुपतये च नम उग्राय च भीमाय च नमो
∪ I ∪ I ∪ I ∪ ∪ I ∪ I
अग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो

वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय नमश्शंभवे च मयोभवे च
नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च
नमस्तीर्थ्याय च कूल्याय च नमः पार्याय चावार्याय च नमः
प्रतरणाय चोत्तरणाय च नम आतार्याय चालाद्याय च नमः
शष्प्याय च फेन्याय च नमः सिकत्याय च प्रवाह्याय च ॥ ८
॥

नम इरिण्याय च प्रपथ्याय च नमः किग्ंशिलाय च क्षयणाय
च नमः कपर्दिने च पुलस्तये च नमो गोष्ठ्याय च गृह्याय च
नमस्तल्प्याय च गेह्याय च नमः काट्याय च गह्वरेष्ठाय च
नमो हृदय्याय च निवेष्प्याय च नमः पाग्ं सव्याय च
रजस्याय च नमः शुष्क्याय च हरित्याय च नमो लोप्याय
चोलप्याय च नम ऊर्म्याय च सूर्म्याय च नमः पर्ण्याय च
पर्णशद्याय च नमोऽपगुरमाणाय चाभिघ्नते च नम आख्खिदते
च प्रख्खिदते च नमो वः किरिकेभ्यो देवानाग्ं हृदयेभ्यो नमो
विक्षीणकेभ्यो नमो विचिन्वत्केभ्यो नम आनिर्_हतेभ्यो नम

आमीवत्केभ्यः ॥ ९ ॥

द्रापे अन्धसस्पते दरिद्रन्नीललोहित । ऐषां पुरुषाणामेषां
पशूनां मा भेर्माऽरो मो ऐषां किञ्चनाममत् । या ते रुद्र शिवा
तनूः शिवा विश्वाहभेषजी । शिवा रुद्रस्य भेषजी तया नो मृड
जीवसे । इमागं् रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे
मतिम् । यथा नः शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे
अस्मिन्ननातुरम् । मृडा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय
नमसा विधेम ते । यच्छं च योश्च मनुरायजे पिता तदश्याम
तव रुद्र प्रणीतौ । मा नो महान्तमुत मा नो अर्भकं मा न
उक्षन्तमुत मा न उक्षितम् । मा नोऽवधीः पितरं मोत मातरं
प्रिया मा नस्तनुवो रुद्र रीरिषः । मा नस्तोके तनये मा न
आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः । वीरान्मा नो रुद्र
भामितोऽवधीर्हविष्मन्तो नमसा विधेम ते । आरात्ते गोघ्न उत
पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु । रक्षा च नो अधि च
देव ब्रूह्यधा च नः शर्म यच्छ द्विबर्हाः । स्तुहि श्रुतं गर्तसदं

युवानं मृगन्न भीममुपहत्नुमुग्रम् । मृडा जरित्रे रुद्र स्तवानो
अन्यन्ते अस्मन्निवपन्तु सेनाः । परिणो रुद्रस्य हेतिर्वृणक्तु परि
त्वेषस्य दुर्मति रघायोः । अव स्थिरा मघवद्भ्यस्तनुष्व
मीढ्वस्तोकाय तनयाय मृडय । मीढुष्टम शिवतम शिवो नः
सुमना भव । परमे वृक्ष आयुधन्निधाय कृत्तिं वसान आचर
पिनाकं बिभ्रदागहि । विकिरिद विलोहित नमस्ते अस्तु भगवः
। यास्ते सहस्रग्ं हेतयोन्यमस्मन्निवपन्तु ताः । सहस्राणि
सहस्रधा बाहुवोस्तव हेतयः । तासामीशानो भगवः पराचीना
मुखा कृधि ॥ १० ॥

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् । तेषाग्ं
सहस्रयोजनेऽवधन्वानि तन्मसि । अस्मिन्महत्यर्णवेऽन्तरिक्षे
भवा अधि । नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः ।
नीलग्रीवाः शितिकण्ठा दिवग्ं रुद्रा उपश्रिताः । ये वृक्षेषु
सस्पिञ्जरा नीलग्रीवा विलोहिताः । ये भूतानामधिपतयो
विशिखासः कपर्दिनः । ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो

जनान् । ये पथां पथिरक्षय ऐलबृदा यव्युधः । ये तीर्थानि
प्रचरन्ति सृकावन्तो निषङ्गिणः । य ऐतावन्तश्च भूयाग्ंसश्च
दिशो रुद्रा वितस्थिरे । तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि
। नमो रुद्रेभ्यो ये पृथिव्यां येऽन्तरिक्षे ये दिवि येषामन्नं वातो
वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश
प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं
द्विष्मो यश्च नो द्वेष्टि तं वो जंभे दधामि ॥ ११ ॥

त्र्यंबकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव
बन्धनान्मृत्योर्मुक्षीय माऽमृतात् । यो रुद्रो अग्नौ यो अप्सु य
ओषधीषु यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो
अस्तु । तमु ष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति
भेषजस्य । यक्ष्वामहे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य
। अयं मे हस्तो भगवानयं मे भगवत्तरः । अयं मे
विश्वभेषजोऽयग्ं शिवाभिमर्शनः । ये ते सहस्रमयुतं पाशा

मृत्यो मर्त्याय हन्तवे । तान् यज्ञस्य मायया सर्वानव यजामहे । मृत्यवे स्वाहा मृत्यवे स्वाहा । ॐ नमो भगवते रुद्राय विष्णवे मृत्युर्मे पाहि ॥ प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः । तेनान्नेनाप्यायस्व । सदाशिवोम् ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## श्री रुद्रप्रश्नः – चमकप्रश्नः

ॐ अग्नाविष्णू सजोषसेमा वर्धन्तु वां गिरः ।
द्युम्नैर्वाजेभिरागतम् । वाजश्च मे प्रसवश्च मे प्रयतिश्च मे
प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे
श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपानश्च
मे व्यानश्च मेऽसुश्च मे चित्तं च म आधीतं च मे वाक्च मे
मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च म ओजश्च
मे सहश्च म आयुश्च मे जरा च म आत्मा च मे तनूश्च मे
शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थानि च मे परूग्ंषि च
मे शरीराणि च मे ॥ १ ॥

ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च
मेऽंभश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च
मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे सत्यं च
मे श्रद्धा च मे जगच्च मे धनं च मे वशश्च मे त्विषिश्च मे

क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च
मे सुकृतं च मे वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च
मे सुगं च मे सुपथं च म ऋद्धं च म ऋद्धिश्च मे क्लृप्तं च
मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे ॥ २ ॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे
सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे
भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे
धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च
मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं
च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च
मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च
मे ॥ ३ ॥

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च
मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म
औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु

च मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च
मेऽक्षितिश्च मे कूयवाश्च मेऽन्नं च मेऽक्षुच्च मे व्रीहयश्च मे
यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे
गोधूमाश्च मे मसुराश्च मे प्रियंगवश्च मेऽणवश्च मे श्यामकाश्च मे
नीवाराश्च मे ॥ ४ ॥

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च
मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे सीसं च मे त्रपुश्च मे
श्यामं च मे लोहं च मेऽग्निश्च म आपश्च मे वीरुधश्च म
ओषधयश्च मे कृष्टपच्यं च मेऽकृष्टपच्यं च मे ग्राम्याश्च मे
पशव आरण्याश्च यज्ञेन कल्पन्तां वित्तं च मे वित्तिश्च मे भूतं
च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च
मेऽर्थश्च म ऐमश्च म इतिश्च मे गतिश्च मे ॥ ५ ॥

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म
इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे
बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म

इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे धाता च म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मेऽश्विनौ च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च मेऽन्तरिक्षं च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे मूर्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे ॥ ६ ॥ ॥

अगंशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपागंशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च मेऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्_नीवतश्च मे हारियोजनश्च मे ॥ ७ ॥

इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मेऽधिषवणे च मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च म आधवनीयश्च

म आग्नीध्रं च मे हविर्धानं च मे गृहाश्च मे सदश्च मे
पुरोडाशाश्च मे पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे ॥ ८ ॥
अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च
मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मे
शक्क्वरीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्तामृक्च मे साम च
मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं
च मेऽहोरात्रयोर्वृष्ट्या बृहद्रथन्तरे च मे यज्ञेन कल्पेताम् ॥ ९
॥

गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे
दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे
त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे पष्ठवाट् च मे
पष्ठौही च म उक्षा च मे वशा च म ऋषभश्च मे वेहच्च
मेऽनड्वाञ्च मे धेनुश्च म आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन
कल्पतामपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन
कल्पताग् श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां वाग्यज्ञेन

कल्पतामात्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम् ॥ १० ॥
ऐका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च म
ऐकादश च मे त्रयोदश च मे पञ्चदश च मे सप्तदश च मे
नवदश च म ऐकविग्ंशतिश्च मे त्रयोविग्ंशतिश्च मे
पञ्चविग्ंशतिश्च मे सप्तविग्ंशतिश्च मे नवविग्ंशतिश्च म
ऐकत्रिग्ंशच्च मे त्रयस्त्रिग्ंशच्च मे चतस्रश्च मेऽष्टौ च मे
द्वादश च मे षोडश च मे विग्ंशतिश्च मे चतुर्विग्ंशतिश्च
मेऽष्टाविग्ंशतिश्च मे द्वात्रिग्ंशच्च मे षट्__त्रिग्ंशच्च मे
चत्वरिग्ंशच्च मे चतुश्चत्वारिग्ंशच्च मेऽष्टाचत्वारिग्ंशच्च मे
वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च मूर्धा च
व्यश्नियश्चान्त्यायनश्चान्त्यश्च भौवनश्च भुवनश्चाधिपतिश्च ॥ ११ ॥
ॐ इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि
शग्ंसिषद्विश्वेदेवाः सूक्तवाचः पृथिवीमातर्मा मा हिग्ंसीर्मधु
मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं
देवेभ्यो वाचमुद्यासग्ं शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु

शोभायै पितरोऽनुमदन्तु ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

# श्री शिव पंचाक्षर स्तोत्रं

नागेंद्रहाराय त्रिलोचनाय भस्मांगरागाय महेश्वराय ।
नित्याय शुद्धाय दिगंबराय तस्मै नकाराय नमः शिवाय ॥ १ ॥
मन्दाकिनीसलिलचंदनचर्चिताय
नन्दीश्वरप्रमथनाथमहेश्वराय । मन्दारपुष्पबहुपुष्पसुपूजिताय तस्मै
मकाराय नमः शिवाय ॥ २ ॥
शिवाय गौरीवदनारविन्दसूर्याय दक्षाध्वरनाशकाय । श्रीनीलकंठाय
वृषध्वजाय तस्मै शिकाराय नमः शिवाय ॥ ३ ॥
वसिष्ठकुंभोद्भवगौतमार्य–मुनींद्रदेवार्चितशेखराय ।
चंद्रार्कवैश्वानरलोचनाय तस्मै वकाराय नमः शिवाय ॥ ४ ॥
यक्षस्वरूपाय जटाधराय पिनाकहस्ताय सनातनाय । दिव्याय देवाय
दिगंबराय तस्मै यकाराय नमः शिवाय ॥ ५ ॥
पञ्चाक्षमिदम् पुण्यम् यः पठेछिवसन्निधौ।
शिवलोकमवाप्नोति शिवेन सहमोदते ॥६॥

# लिंगाष्टकं

ब्रह्ममुरारिसुरार्चितलिंगं निर्मलभासितशोभितलिंगं ।
जन्मजदुःखविनाशकलिंगं तत्प्रणमामि सदाशिवलिंगं ॥ १ ॥
देवमुनिप्रवरार्चितलिंगं कामदहन करुणाकर लिंगं ।
रावणदर्पविनाशकलिंगं तत्प्रणमामि सदाशिव लिंगं ॥ २ ॥
सर्वसुगंधिसुलेपितलिंगं बुद्धिविवर्धनकारणलिंगं ।
सिद्धसुरासुरवंदितलिंगं तत्प्रणमामि सदाशिव लिंगं ॥ ३ ॥
कनकमहामणिभूषितलिंगं फणिपतिवेष्टित शोभित लिंगं ।
दक्षसुयज्ञ विनाशन लिंगं तत्प्रणमामि सदाशिव लिंगं ॥ ४ ॥
कुंकुमचंदनलेपितलिंगं पंकजहारसुशोभितलिंगं ।
संचितपापविनाशनलिंगं तत्प्रणमामि सदाशिव लिंगं ॥ ५ ॥
देवगणार्चितसेवितलिंगं भावैर्भक्तिभिरेव च लिंगं ।
दिनकरकोटिप्रभाकरलिंगं तत्प्रणमामि सदाशिव लिंगं ॥ ६ ॥
अष्टदळोपरिवेष्टितलिंगं सर्वसमुद्भवकारणलिंगं ।
अष्टदरिद्रविनाशकलिंगं तत्प्रणमामि सदाशिव लिंगं ॥ ७ ॥
सुरगुरुसुरवरपूजित लिंगं सुरवनपुष्पसदार्चित लिंगं । परात्परं
परमात्मक लिंगं तत्प्रणमामि सदाशिव लिंगं ॥ ८ ॥
लिंगाष्टकमिदं पुण्यं यः पठेत् शिवसन्निधौ । शिवलोकमवाप्नोति
शिवेन सह मोदते ॥

## श्री शिव अष्टोत्तर शतनामावळिः

ॐ शिवाय नमः । ॐ महेश्वराय नमः । ॐ शंभवे नमः । ॐ पिनाकिने नमः । ॐ शशिशेखराय नमः । ॐ वामदेवाय नमः । ॐ विरूपाक्षाय नमः । ॐ कपर्दिने नमः । ॐ नीललोहिताय नमः । ॐ शंकराय नमः । १० ॥

ॐ शूलपाणिने नमः । ॐ खट्वांगिने नमः । ॐ विष्णुवल्लभाय नमः । ॐ शिपिविष्टाय नमः । ॐ अंबिकानाथाय नमः । ॐ श्रीकंठाय नमः । ॐ भक्तवत्सलाय नमः । ॐ भवाय नमः । ॐ शर्वाय नमः । ॐ त्रिलोकेशाय नमः । २० ॥

ॐ शितिकंठाय नमः । ॐ शिवाप्रियाय नमः । ॐ उग्राय नमः । ॐ कपालिने नमः । ॐ कामारये नमः । ॐ अंधकासुरसूदनाय नमः । ॐ गंगाधराय नमः । ॐ ललाटाक्षाय नमः । ॐ कालकालाय नमः । ॐ कृपानिधये नमः । ३० ॥

ॐ भीमाय नमः । ॐ परशुहस्ताय नमः । ॐ मृगपाणये नमः । ॐ जटाधराय नमः । ॐ कैलासवासिने नमः । ॐ कवचिने नमः । ॐ कठोराय नमः । ॐ त्रिपुरांतकाय नमः । ॐ वृषांकाय नमः । ॐ वृषभारूढाय नमः । ४० ॥

ॐ भस्मोद्धूलितविग्रहाय नमः । ॐ सामप्रियाय नमः । ॐ स्वरमयाय नमः । ॐ त्रयीमूर्तये नमः । ॐ अनीश्वराय नमः । ॐ सर्वज्ञाय नमः । ॐ परमात्मने नमः । ॐ सोमसूर्याग्निलोचनाय नमः । ॐ हविषे नमः । ॐ यज्ञमयाय नमः । ५० ॥

ॐ सोमाय नमः । ॐ पंचवक्त्राय नमः । ॐ सदाशिवाय नमः ।

ॐ विश्वेश्वराय नमः । ॐ वीरभद्राय नमः । ॐ गणनाथाय नमः ।
ॐ प्रजापतये नमः । ॐ हिरण्यरेतसे नमः । ॐ दुर्धर्षाय नमः ।
ॐ गिरीशाय नमः । ६० ॥

ॐ गिरिशाय नमः । ॐ अनघाय नमः । ॐ भुजंगभूषणाय नमः ।
ॐ भर्गाय नमः । ॐ गिरिधन्वने नमः । ॐ गिरिप्रियाय नमः । ॐ
कृत्तिवाससे नमः । ॐ पुरारातये नमः । ॐ भगवते नमः । ॐ
प्रमथाधिपाय नमः । ७० ॥

ॐ मृत्युंजयाय नमः । ॐ सूक्ष्मतनवे नमः । ॐ जगद्व्यापिने
नमः । ॐ जगद्गुरुवे नमः । ॐ व्योमकेशाय नमः । ॐ
महासेनजनकाय नमः । ॐ चारुविक्रमाय नमः । ॐ रुद्राय नमः ।
ॐ भूतपतये नमः । ॐ स्थाणवे नमः । ८० ॥

ॐ अहिर्बुध्न्याय नमः । ॐ दिगंबराय नमः । ॐ अष्टमूर्तये नमः ।
ॐ अनेकात्मने नमः । ॐ सात्त्विकाय नमः । ॐ शुद्धविग्रहाय
नमः । ॐ शाश्वताय नमः । ॐ खंडपरशवे नमः । ॐ अजाय
नमः । ॐ पाशविमोचकाय नमः । ९० ॥

ॐ मृडाय नमः । ॐ पशुपतये नमः । ॐ देवाय नमः । ॐ
महादेवाय नमः । ॐ अव्ययाय नमः । ॐ हरये नमः । ॐ
पूषदंतभिदे नमः । ॐ अव्यग्राय नमः । ॐ दक्षाध्वरहराय नमः ।
ॐ हराय नमः । १०० ॥

ॐ भगनेत्रभिदे नमः । ॐ अव्यक्ताय नमः । ॐ सहस्राक्षाय नमः
। ॐ सहस्रपदे नमः । ॐ अपवर्गप्रदाय नमः । ॐ अनंताय नमः ।
ॐ तारकाय नमः । ॐ परमेश्वराय नमः । १०८ ॥

# मन्त्रपुष्पम् ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः
। स्थिरैरङ्गैस्तुष्टुवाग्ंसस्तनूभिः । व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥
ॐ शान्तिः शान्तिः शान्तिः ।
ॐ योऽपां पुष्पं वेद । पुष्पवान् प्रजावान् पशुमान् भवति ।
चन्द्रमा वा अपां पुष्पम् । पुष्पवान् प्रजावान् पशुमान् भवति ।
य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ।
अग्निर्वा अपामायतनम् । आयतनवान् भवति । योऽग्नेरायतनं
वेद ॥ आयतनवान् भवति । आपो वा अग्नेरायतनम् ।
आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद ।
आयतनवान् भवति । वायुर्वा अपामायतनम् । आयतनवान्

भवति । यॊ वायॊरायतनं वॆद । आयतनवान् भवति ॥ आपॊ वै
वायॊरायतनम् । आयतनवान् भवति । य ऎवं वॆद ।
यॊऽपामायतनं वॆद । आयतनवान् भवति । असौ वै
तपन्नपामायतनम् । आयतनवान् भवति । यॊऽमुष्य तपत
आयतनं वॆद । आयतनवान् भवति । आपॊ वा अमुष्य तपत
आयतनम् ॥ आयतनवान् भवति । य ऎवं वॆद । यॊऽपामायतनं
वॆद । आयतनवान् भवति । चन्द्रमा वा अपामायतनम् ।
आयतनवान् भवति । यश्चन्द्रमस आयतनं वॆद । आयतनवान्
भवति । आपॊ वै चन्द्रमस आयतनम्। आयतनवान् भवति ॥
य ऎवं वॆद । यॊऽपामायतनं वॆद । आयतनवान् भवति ।
नक्षत्राणि वा अपामायतनम् । आयतनवान् भवति । यॊ
नक्षत्राणामायतनं वॆद । आयतनवान् भवति । आपॊ वै
नक्षत्राणामायतनम् । आयतनवान् भवति । य ऎवं वॆद ॥
यॊऽपामायतनं वॆद । आयतनवान् भवति । पर्जन्यॊ वा
अपामायतनम् । आयतनवान् भवति । यः पर्जन्यस्यायतनं वॆद

। आयतनवान् भवति । आपो वै पर्जन्यस्याऽऽयतनम् ।
आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद ॥
आयतनवान् भवति । संवत्सरो वा अपामायतनम् ।
आयतनवान् भवति । यस्संवत्सरस्यायतनं वेद । आयतनवान्
भवति । आपो वै संवत्सरस्यायतनम् । आयतनवान् भवति ।
य एवं वेद । योऽप्सु नावं प्रतिष्ठितां वेद । प्रत्येव तिष्ठति ॥
ॐ राजाधिराजाय प्रसह्यसाहिने । नमो वयं वैश्रवणाय कुर्महे
। स मे कामान्कामकामाय मह्यम् । कामेश्वरो वैश्रवणो ददातु ।
कुबेराय वैश्रवणाय । महाराजाय नमः ॥ ॐ शान्तिः शान्तिः
शान्तिः ॥

# गणपत्यथर्वशीर्षोपनिषत् ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाग्ं सस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न
इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो
अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥
ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्त्वमसि । त्वमेव केवलं
कर्ताऽसि । त्वमेव केवलं धर्ताऽसि । त्वमेव केवलं हर्ताऽसि । त्वमेव
सर्वं खल्विदं ब्रह्मासि । त्वं साक्षादात्माऽसि नित्यम् ॥ १ ॥
ऋतं वच्मि । सत्यं वच्मि ॥ २ ॥
अव त्वं माम् । अव वक्तारम् । अव श्रोतारम् । अव दातारम् । अव
धातारम् । अवानूचानमव शिष्यम् । अव पश्चात्तात् । अव पुरस्तात् ।
अवोत्तरात्तात् । अव दक्षिणात्तात् । अव चोर्ध्वात्तात् । अवाधरात्तात् ।
सर्वतो मां पाहि पाहि समन्तात् ॥ ३ ॥
त्वं वाङ्मयस्त्वं चिन्मयः । त्वमानन्दमयस्त्वं ब्रह्ममयः । त्वं

सच्चिदानन्दाद्वितीयोऽसि । त्वं प्रत्यक्षं ब्रह्मासि । त्वं ज्ञानमयो
विज्ञानमयोऽसि ॥ ४ ॥

सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति । सर्वं
जगदिदं त्वयि लयमेष्यति । सर्वं जगदिदं त्वयि प्रत्येति । त्वं
भूमिरापोऽनलोऽनिलो नभः । त्वं चत्वारि वाक्पदानि ॥ ५ ॥

त्वं गुणत्रयातीतः । त्वं अवस्थात्रयातीतः । त्वं देहत्रयातीतः । त्वं
कालत्रयातीतः । त्वं मूलाधारस्थितोऽसि नित्यम् । त्वं शक्तित्रयात्मकः
। त्वां योगिनो ध्यायन्ति नित्यम् । त्वं ब्रह्मा त्वं विष्णुस्त्वं
रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवः
स्वरोम् ॥ ६ ॥

गणादिं पूर्वमुच्चार्य वर्णादींस्तदनन्तरम् । अनुस्वारः परतरः ।
अर्धेन्दुलसितम् । तारेण ऋद्धम् । ऐतत्तव मनुस्वरूपम् । गकारः
पूर्वरूपम् । अकारो मध्यमरूपम् । अनुस्वारश्चान्त्यरूपम् ।
बिन्दुरुत्तररूपम् । नादः सन्धानम् । सग्ंहिता सन्धिः । सैषा
गणेशविद्या । गणक ऋषिः । निचृद्गायत्री छन्दः । महागणपतिर्देवता ।
ॐ गं गणपतये नमः ॥ ७ ॥

ऐकदन्ताय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात् ॥

८ ॥

ऐकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् । रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम् । रक्तं लंबोदरं शूर्पकर्णकं रक्तवाससम् । रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम् । भक्तानुकम्पिनं देवं जगत्कारणमच्युतम् । आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् । ऐवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥ ९ ॥

नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु लंबोदराय ऐकदन्ताय विघ्नविनाशिने शिवसुताय श्रीवरदमूर्तये नमः ॥ १० ॥

ऐतदथर्वशीर्षं योऽधीते । स ब्रह्मभूयाय कल्पते । स सर्वविघ्नैर्न बाध्यते । स सर्वत्र सुखमेधते । स पञ्चमहापापात् प्रमुच्यते । सायमधीयानो दिवसकृतं पापं नाशयति । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायं प्रातः प्रयुञ्जानो पापोऽपापो भवति । सर्वत्रा धीयानो ऽपविघ्नो भवति । धर्मार्थकाममोक्षं च विन्दति । इदमथर्वशीर्षमशिष्याय न देयम् । यो यदि मोहाद् दास्यति । स पापीयान् भवति । सहस्रावर्तनाद्यं यं काममधीते । तं तमनेन साधयेत्

॥ ११ ॥

अनेन गणपतिमभिषिञ्चति । स वाग्मी भवति । चतुर्थ्यामनश्नन् जपति । स विद्यावान् भवति । इत्यथर्वणवाक्यम् । ब्रह्माद्यावरणं विद्यान्न बिभेति कदाचनेति ॥ १२ ॥

यो दूर्वाङ्कुरैर्यजति । स वैश्रवणोपमो भवति । यो लाजैर्यजति । स यशोवान् भवति । स मेधावान् भवति । यो मोदकसहस्रेण यजति । स वाञ्छितफलमवाप्नोति । यः साज्य समिद्भिर्यजति । स सर्वं लभते स सर्वं लभते ॥ १३ ॥

अष्टौ ब्राह्मणान् सम्यग् ग्राहयित्वा । सूर्यवर्चस्वी भवति । सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा सिद्धमन्त्रो भवति । महाविघ्नात् प्रमुच्यते । महादोषात् प्रमुच्यते । महापापात् प्रमुच्यते । महाप्रत्यवायात् प्रमुच्यते । स सर्वविद्भवति स सर्वविद्भवति । य एवं वेद । इत्युपनिषत् ॥ १४ ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

# दुर्गा सूक्तं

ॐ जातवेदसे सुनवाम सोम मरातीयतो निदहाति वेदः । स
नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः ॥
तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् ।
दुर्गां देवीग्ं शरणमहं प्रपद्ये सुतरसि तरसे नमः ॥ अग्ने त्वं
पारया नव्यो अस्मान्थ्स्वस्तिभिरति दुर्गाणि विश्वा । पूश्च पृथ्वी
बहुला न उर्वी भवा तोकाय तनयाय शंयोः ॥ विश्वानि नो
दुर्गहा जातवेदः सिन्धुन्न नावा दुरिताऽतिपर्षि । अग्ने
अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम् ॥ पृतना
जितग्ं सहमानमुग्रमग्निग्ं हुवेम परमाथ्सधस्थात् । स नः
पर्षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरिताऽत्यग्निः ॥ प्रत्नोषि
कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि । स्वाञ्चाऽग्ने
तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व ॥ गोभिर्जुष्टमयुजो

निषिक्तं तवेन्द्र विष्णोरनुसञ्चरेम । नाकस्य पृष्ठमभि संवसानो
वैष्णवीं लोक इह मादयन्ताम् ॥ ॐ कात्यायनाय विद्महे
कन्यकुमारि धीमहि । तन्नो दुर्गिः प्रचोदयात् ॥ ॐ शान्तिः
शान्तिः शान्तिः ॥

**<u>श्री ललिता सहस्र नाम स्तोत्रं</u>**

॥ न्यासः ॥

ॐ अस्य श्रीललितादिव्यसहस्रनामस्तोत्रमहामंत्रस्य ।

वशिन्यादिवाग्देवता ऋषयः ।

अनुष्टुप् छंदः । श्रीललितापरमेश्वरी देवता । श्रीमद्वाग्भवकूटेति बीजम्
।

मध्यकूटेति शक्तिः । शक्तिकूटेति कीलकम् ।

श्रीललितामहात्रिपुरसुंदरीप्रसादसिद्धि द्वारा चिन्तित  फलावाप्त्यर्थे
जपे विनियोगः ।

**<u>॥ ध्यानम् ॥</u>**

सिंदूरारुणविग्रहां त्रिनयनां माणिक्यमौळिस्फुरत्
तारानायकशेखरां स्मितमुखीमापीन वक्षोरुहाम् ।
पाणिभ्यामलिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं
सौम्यां रत्नघटस्थरक्तचरणां ध्यायेत्परामंबिकाम् ॥

अरुणां करुणा तरंगिताक्षीं धृतपाशांकुशपुष्पबाणचापाम् ।
अणिमादिभिरावृतां मयूखैरहमित्येव विभावये भवानीम् ॥

ध्यायेत्पद्मासनस्थां विकसितवदनां पद्मपत्रायताक्षीं

हेमाभां पीतवस्त्रां करकलितलसद्धेमपद्मां वरांगीम् ।
सर्वालंकारयुक्तां सततमभयदां भक्तनम्रां भवानीं
श्रीविद्यां शांतमूर्तिं सकलसुरनुतां सर्वसंपत्प्रदात्रीम् ॥

सकुंकुमविलेपनामलिकचुंबिकस्तूरिकां
समंदहसितेक्षणां सशरचापपाशांकुशाम् ।
अशेषजनमोहिनीं अरुणमाल्यभूषोज्ज्वलाम्
जपाकुसुमभासुरां जपविधौ स्मरेदंबिकाम् ॥

## <u>स्तोत्रम्</u>

ॐ श्रीमाता श्रीमहाराज्ञी श्रीमत्सिंहासनेश्वरी ।
चिदग्निकुंडसंभूता देवकार्यसमुद्यता ॥ १ ॥
उद्यद्भानुसहस्राभा चतुर्बाहुसमन्विता ।
रागस्वरूपपाशाढ्या क्रोधाकारांकुशोज्ज्वला ॥ २ ॥
मनोरूपेक्षुकोदंडा पंचतन्मात्रसायका ।
निजारुणप्रभापूरमज्जद्ब्रह्मांडमंडला ॥ ३ ॥
चंपकाशोकपुन्नागसौगन्धिकलसत्कचा ।
कुरुविंदमणिश्रेणीकनत्कोटीरमंडिता ॥ ४ ॥
अष्टमीचंद्र–विभ्राजदळिकस्थलशोभिता ।
मुखचंद्रकळंकाभमृगनाभिविशेषका ॥ ५ ॥
वदनस्मरमांगल्यगृहतोरणचिल्लिका ।

वक्त्रलक्ष्मीपरीवाहचलन्मीनाभलोचना ॥ ६ ॥
नवचंपकपुष्पाभनासादंडविराजिता ।
ताराकांतितिरस्कारिनासाभरणभासुरा ॥ ७ ॥
कदंबमंजरीक्लुप्तकर्णपूरमनोहरा ।
ताटंकयुगळीभूततपनोडुपमंडला ॥ ८ ॥
पद्मरागशिलादर्शपरिभाविकपोलभूः ।
नवविद्रुमबिंबश्रीन्यक्कारिरदनच्छदा ॥ ९ ॥
शुद्धविद्यांकुराकारद्विजपंक्तिद्वयोज्ज्वला ।
कर्पूरवीटिकामोदसमाकर्षदिगंतरा ॥ १० ॥
निजसल्लापमाधुर्यविनिर्भर्त्सितकच्छपी ।
मंदस्मितप्रभापूरमज्जत्कामेशमानसा ॥ ११ ॥
अनाकलितसादृश्यचुबुकश्रीविराजिता ।
कामेशबद्धमांगल्यसूत्रशोभितकन्धरा ॥ १२ ॥
कनकांगदकेयूरकमनीयभुजान्विता ।
रत्नग्रैवेयचिंताकलोलमुक्ताफलान्विता ॥ १३ ॥
कामेश्वरप्रेमरत्नमणिप्रतिपणस्तनी ।
नाभ्यालवालरोमाळिलताफलकुचद्वयी ॥ १४ ॥
लक्ष्यरोमलताधारतासमुन्नेयमध्यमा ।
स्तनभारदळन्मध्यपट्टबंधवळित्रया ॥ १५ ॥
अरुणारुणकौसुंभवस्त्रभास्वत्कटीतटी ।
रत्नकिंकिणिकारम्यरशनादामभूषिता ॥ १६ ॥
कामेशज्ञातसौभाग्यमार्दवोरुद्वयान्विता ।

माणिक्यमुकुटाकारजानुद्वयविराजिता ॥ १७ ॥
इंद्रगोपपरिक्षिप्तस्मरतूणाभजंघिका ।
गूढगुल्फा कूर्मपृष्ठजयिष्णुप्रपदान्विता ॥ १८ ॥
नखदीधितिसंछन्ननमज्जनतमोगुणा ।
पदद्वयप्रभाजालपराकृतसरोरुहा ॥ १९ ॥
सिंजानमणिमंजीरमंडितश्रीपदांबुजा ।
मराळीमंदगमना महालावण्यशेवधिः ॥ २० ॥
सर्वारुणानवद्यांगी सर्वाभरणभूषिता ।
शिवकामेश्वरांकस्था शिवा स्वाधीनवल्लभा ॥ २१ ॥
सुमेरुमध्यशृंगस्था श्रीमन्नगरनायिका ।
चिंतामणिगृहांतस्था पंचब्रह्मासनस्थिता ॥ २२ ॥
महापद्माटवीसंस्था कदंबवनवासिनी ।
सुधासागरमध्यस्था कामाक्षी कामदायिनी ॥ २३ ॥
देवर्षिगणसंघातस्तूयमानात्मवैभवा ।
भंडासुरवधोद्युक्तशक्तिसेनासमन्विता ॥ २४ ॥
संपत्करीसमारूढसिंधुरव्रजसेविता ।
अश्वारूढाधिष्ठिताश्वकोटिकोटिभिरावृता ॥ २५ ॥
चक्रराजरथारूढसर्वायुधपरिष्कृता ।
गेयचक्ररथारूढमंत्रिणीपरिसेविता ॥ २६ ॥
किरिचक्ररथारूढदंडनाथापुरस्कृता ।
ज्वालामालिनिकाक्षिप्तवह्निप्राकारमध्यगा ॥ २७ ॥
भंडसैन्यवधोद्युक्तशक्तिविक्रमहर्षिता ।

नित्यापराक्रमाटोपनिरीक्षणसमुत्सुका ॥ २८ ॥
भंडपुत्रवधोद्युक्तबालाविक्रमनंदिता ।
मंत्रिण्यंबाविरचितविषंगवधतोषिता ॥ २९ ॥
विशुक्रप्राणहरणवाराहीवीर्यनंदिता ।
कामेश्वरमुखालोककल्पितश्रीगणेश्वरा ॥ ३० ॥
महागणेशनिर्भिन्नविघ्नयंत्रप्रहर्षिता ।
भंडासुरेंद्रनिर्मुक्तशस्त्रप्रत्यस्त्रवर्षिणी ॥ ३१ ॥
करांगुळिनखोत्पन्ननारायणदशाकृतिः ।
महापाशुपतास्त्राग्निनिर्दग्धासुरसैनिका ॥ ३२ ॥
कामेश्वरास्त्रनिर्दग्धसभंडासुरशून्यका ।
ब्रह्मोपेंद्रमहेंद्रादिदेवसंस्तुतवैभवा ॥ ३३ ॥
हरनेत्राग्निसंदग्धकामसंजीवनौषधिः ।
श्रीमद्वाग्भवकूटैकस्वरूपमुखपंकजा ॥ ३४ ॥
कंठाधःकटिपर्यंतमध्यकूटस्वरूपिणी ।
शक्तिकूटैकतापन्नकट्यधोभागधारिणी ॥ ३५ ॥
मूलमंत्रात्मिका मूलकूटत्रयकळेबरा ।
कुलामृतैकरसिका कुलसंकेतपालिनी ॥ ३६ ॥
कुलांगना कुलांतस्था कौळिनी कुलयोगिनी ।
अकुला समयांतस्था समयाचारतत्परा ॥ ३७ ॥
मूलाधारैकनिलया ब्रह्मग्रंथिविभेदिनी ।
मणिपूरांतरुदिता विष्णुग्रंथिविभेदिनी ॥ ३८ ॥
आज्ञाचक्रांतरालस्था रुद्रग्रंथिविभेदिनी ।

सहस्रारांबुजारूढा सुधासाराभिवर्षिणी ॥ ३९ ॥
तटिल्लतासमरुचिः षट्चक्रोपरिसंस्थिता ।
महाशक्तिः कुंडलिनी बिसतंतुतनीयसी ॥ ४० ॥
भवानी भावनागम्या भवारण्यकुठारिका ।
भद्रप्रिया भद्रमूर्तिर्–भक्तसौभाग्यदायिनी ॥ ४१ ॥
भक्तिप्रिया भक्तिगम्या भक्तिवश्या भयापहा ।
शांभवी शारदाराध्या शर्वाणी शर्मदायिनी ॥ ४२ ॥
शांकरी श्रीकरी साध्वी शरच्चंद्रनिभानना ।
शातोदरी शांतिमती निराधारा निरंजना ॥ ४३ ॥
निर्लेपा निर्मला नित्या निराकारा निराकुला ।
निर्गुणा निष्कला शांता निष्कामा निरुपप्लवा ॥ ४४ ॥
नित्यमुक्ता निर्विकारा निष्प्रपंचा निराश्रया ।
नित्यशुद्धा नित्यबुद्धा निरवद्या निरंतरा ॥ ४५ ॥
निष्कारणा निष्कळंका निरुपाधि–र्निरीश्वरा ।
नीरागा रागमथनी निर्मदा मदनाशिनी ॥ ४६ ॥
निश्चिंता निरहंकारा निर्मोहा मोहनाशिनी ।
निर्ममा ममताहंत्री निष्पापा पापनाशिनी ॥ ४७ ॥
निष्क्रोधा क्रोधशमनी निर्लोभा लोभनाशिनी ।
निस्संशया संशयघ्नी निर्भवा भवनाशिनी ॥ ४८ ॥
निर्विकल्पा निराबाधा निर्भेदा भेदनाशिनी ।
निर्नाशा मृत्युमथनी निष्क्रिया निष्परिग्रहा ॥ ४९ ॥
निस्तुला नीलचिकुरा निरपाया निरत्यया ।

दुर्लभा दुर्गमा दुर्गा दुःखहंत्री सुखप्रदा ॥ ५० ॥
दुष्टदूरा दुराचारशमनी दोषवर्जिता ।
सर्वज्ञा सांद्रकरुणा समानाधिकवर्जिता ॥ ५१ ॥
सर्वशक्तिमयी सर्वमंगळा सद्गतिप्रदा ।
सर्वेश्वरी सर्वमयी सर्वमंत्रस्वरूपिणी ॥ ५२ ॥
सर्वयंत्रात्मिका सर्वतंत्ररूपा मनोन्मनी ।
माहेश्वरी महादेवी महालक्ष्मीर्–मृडप्रिया ॥ ५३ ॥
महारूपा महापूज्या महापातकनाशिनी ।
महामाया महासत्त्वा महाशक्तिर्–महारतिः ॥ ५४ ॥
महाभोगा महैश्वर्या महावीर्या महाबला ।
महाबुद्धिर्–महासिद्धिर्–महायोगेश्वरेश्वरी ॥ ५५ ॥
महातंत्रा महामंत्रा महायंत्रा महासना ।
महायागक्रमाराध्या महाभैरवपूजिता ॥ ५६ ॥
महेश्वरमहाकल्पमहातांडवसाक्षिणी ।
महाकामेशमहिषी महात्रिपुरसुंदरी ॥ ५७ ॥
चतुःषष्ट्युपचाराढ्या चतुःषष्टिकळामयी ।
महाचतुःषष्टिकोटियोगिनीगणसेविता ॥ ५८ ॥
मनुविद्या चंद्रविद्या चंद्रमंडलमध्यगा ।
चारुरूपा चारुहासा चारुचंद्रकळाधरा ॥ ५९ ॥
चराचरजगन्नाथा चक्रराजनिकेतना ।
पार्वती पद्मनयना पद्मरागसमप्रभा ॥ ६० ॥
पंचप्रेतासनासीना पंचब्रह्मस्वरूपिणी ।

चिन्मयी परमानंदा विज्ञानघनरूपिणी ॥ ६१ ॥
ध्यानध्यातृध्येयरूपा धर्माधर्मविवर्जिता ।
विश्वरूपा जागरिणी स्वपन्ती तैजसात्मिका ॥ ६२ ॥
सुप्ता प्राज्ञात्मिका तुर्या सर्वावस्थाविवर्जिता ।
सृष्टिकर्त्री ब्रह्मरूपा गोप्त्री गोविंदरूपिणी ॥ ६३ ॥
संहारिणी रुद्ररूपा तिरोधानकरीश्वरी ।
सदाशिवानुग्रहदा पंचकृत्यपरायणा ॥ ६४ ॥
भानुमंडलमध्यस्था भैरवी भगमालिनी ।
पद्मासना भगवती पद्मनाभसहोदरी ॥ ६५ ॥
उन्मेषनिमिषोत्पन्नविपन्नभुवनावळिः ।
सहस्रशीर्षवदना सहस्राक्षी सहस्रपात् ॥ ६६ ॥
आब्रह्मकीटजननी वर्णाश्रमविधायिनी ।
निजाज्ञारूपनिगमा पुण्यापुण्यफलप्रदा ॥ ६७ ॥
श्रुतिसीमंतसिंधूरीकृतपादाब्जधूळिका ।
सकलागमसंदोहशुक्तिसंपुटमौक्तिका ॥ ६८ ॥
पुरुषार्थप्रदा पूर्णा भोगिनी भुवनेश्वरी ।
अंबिकानादिनिधना हरिब्रह्मेंद्रसेविता ॥ ६९ ॥
नारायणी नादरूपा नामरूपविवर्जिता ।
ह्रींकारी ह्रीमती हृद्या हेयोपादेयवर्जिता ॥ ७० ॥
राजराजार्चिता राज्ञी रम्या राजीवलोचना ।
रंजनी रमणी रस्या रणत्किंकिणिमेखला ॥ ७१ ॥
रमा राकेंदुवदना रतिरूपा रतिप्रिया ।

रक्षाकरी राक्षसघ्नी रामा रमणलंपटा ॥ ७२ ॥
काम्या कामकळारूपा कदंबकुसुमप्रिया ।
कळ्याणी जगतीकंदा करुणारससागरा ॥ ७३ ॥
कळावती कळालापा कांता कादंबरीप्रिया ।
वरदा वामनयना वारुणीमदविह्वला ॥ ७४ ॥
विश्वाधिका वेदवेद्या विंध्याचलनिवासिनी ।
विधात्री वेदजननी विष्णुमाया विलासिनी ॥ ७५ ॥
क्षेत्रस्वरूपा क्षेत्रेशी क्षेत्रक्षेत्रज्ञपालिनी ।
क्षयवृद्धिविनिर्मुक्ता क्षेत्रपालसमर्चिता ॥ ७६ ॥
विजया विमला वंद्या वंदारुजनवत्सला ।
वाग्वादिनी वामकेशी वह्निमंडलवासिनी ॥ ७७ ॥
भक्तिमत्कल्पलतिका पशुपाशविमोचिनी ।
संहृताशेषपाषंडा सदाचारप्रवर्तिका ॥ ७८ ॥
तापत्रयाग्निसंतप्तसमाह्लादनचंद्रिका ।
तरुणी तापसाराध्या तनुमध्या तमोऽपहा ॥ ७९ ॥
चितिस्तत्पदलक्ष्यार्था चिदेकरसरूपिणी ।
स्वात्मानंदलवीभूतब्रह्माद्यानंदसंततिः ॥ ८० ॥
परा प्रत्यक्चितीरूपा पश्यंती परदेवता ।
मध्यमा वैखरीरूपा भक्तमानसहंसिका ॥ ८१ ॥
कामेश्वरप्राणनाडी कृतज्ञा कामपूजिता ।
शृंगाररससंपूर्णा जया जालंधरस्थिता ॥ ८२ ॥
ओड्याणपीठनिलया बिंदुमंडलवासिनी ।

रहोयागक्रमाराध्या रहस्तर्पणतर्पिता ॥ ८३ ॥
सद्यःप्रसादिनी विश्वसाक्षिणी साक्षिवर्जिता ।
षडंगदेवतायुक्ता षाड्गुण्यपरिपूरिता ॥ ८४ ॥
नित्यक्लिन्ना निरुपमा निर्वाणसुखदायिनी ।
नित्याषोडशिकारूपा श्रीकंठार्धशरीरिणी ॥ ८५ ॥
प्रभावती प्रभारूपा प्रसिद्धा परमेश्वरी ।
मूलप्रकृति–रव्यक्ता व्यक्ताव्यक्तस्वरूपिणी ॥ ८६ ॥
व्यापिनी विविधाकारा विद्याऽविद्यास्वरूपिणी ।
महाकामेशनयनकुमुदाह्लादकौमुदी ॥ ८७ ॥
भक्तहार्दतमोभेदभानुमद्भानुसंततिः ।
शिवदूती शिवाराध्या शिवमूर्तिः शिवंकरी ॥ ८८ ॥
शिवप्रिया शिवपरा शिष्टेष्टा शिष्टपूजिता ।
अप्रमेया स्वप्रकाशा मनोवाचामगोचरा ॥ ८९ ॥
चिच्छक्ति–श्चेतनारूपा जडशक्ति–र्जडात्मिका ।
गायत्री व्याहृति–स्संध्या द्विजबृंदनिषेविता ॥ ९० ॥
तत्त्वासना तत्त्वमयी पंचकोशांतरस्थिता ।
निस्सीममहिमा नित्ययौवना मदशालिनी ॥ ९१ ॥
मदघूर्णितरक्ताक्षी मदपाटलगंडभूः ।
चंदनद्रवदिग्धांगी चांपेयकुसुमप्रिया ॥ ९२ ॥
कुशला कोमलाकारा कुरुकुल्ला कुलेश्वरी ।
कुलकुंडालया कौळमार्गतत्परसेविता ॥ ९३ ॥
कुमारगणनाथांबा तुष्टिः पुष्टि–र्मति–र्धृतिः ।

शांतिः स्वस्तिमती कांति–र्नंदिनी विघ्ननाशिनी ॥ ९४ ॥
तेजोवती त्रिनयना लोलाक्षीकामरूपिणी ।
मालिनी हंसिनी माता मलयाचलवासिनी ॥ ९५ ॥
सुमुखी नळिनी सुभ्रूः शोभना सुरनायिका ।
कालकंठी कांतिमती क्षोभिणी सूक्ष्मरूपिणी ॥ ९६ ॥
वज्रेश्वरी वामदेवी वयोऽवस्थाविवर्जिता ।
सिद्धेश्वरी सिद्धविद्या सिद्धमाता यशस्विनी ॥ ९७ ॥
विशुद्धिचक्रनिलयाऽऽरक्तवर्णा त्रिलोचना ।
खट्वांगादिप्रहरणा वदनैकसमन्विता ॥ ९८ ॥
पायसान्नप्रिया त्वक्स्था पशुलोकभयंकरी ।
अमृतादिमहाशक्तिसंवृता ढाकिनीश्वरी ॥ ९९ ॥
अनाहताब्जनिलया श्यामाभा वदनद्वया ।
दंष्ट्रोज्ज्वलाऽक्षमालादिधरा रुधिरसंस्थिता ॥ १०० ॥
काळरात्र्यादिशक्त्यौघवृता स्निग्धौदनप्रिया ।
महावीरेंद्रवरदा राकिन्यंबास्वरूपिणी ॥ १०१ ॥
मणिपूराब्जनिलया वदनत्रयसंयुता ।
वज्रादिकायुधोपेता डामर्यादिभिरावृता ॥ १०२ ॥
रक्तवर्णा मांसनिष्ठा गुडान्नप्रीतमानसा ।
समस्तभक्तसुखदा लाकिन्यंबास्वरूपिणी ॥ १०३ ॥
स्वाधिष्ठानांबुजगता चतुर्वक्त्रमनोहरा ।
शूलाद्यायुधसंपन्ना पीतवर्णाऽतिगर्विता ॥ १०४ ॥
मेदोनिष्ठा मधुप्रीता बंदिन्यादिसमन्विता ।

दध्यन्नासक्तहृदया काकिनीरूपधारिणी ॥ १०५ ॥
मूलाधारांबुजारूढा पंचवक्त्राऽस्थिसंस्थिता ।
अंकुशादिप्रहरणा वरदादिनिषेविता ॥ १०६ ॥
मुद्गौदनासक्तचित्ता साकिन्यंबास्वरूपिणी ।
आज्ञाचक्राब्जनिलया शुक्लवर्णा षडानना ॥ १०७ ॥
मज्जासंस्था हंसवतीमुख्यशक्तिसमन्विता ।
हरिद्रान्नैकरसिका हाकिनीरूपधारिणी ॥ १०८ ॥
सहस्रदळपद्मस्था सर्ववर्णोपशोभिता ।
सर्वायुधधरा शुक्लसंस्थिता सर्वतोमुखी ॥ १०९ ॥
सर्वौदनप्रीतचित्ता याकिन्यंबास्वरूपिणी ।
स्वाहा स्वधाऽमति–र्मेधा श्रुतिः स्मृति–रनुत्तमा ॥ ११० ॥
पुण्यकीर्तिः पुण्यलभ्या पुण्यश्रवणकीर्तना ।
पुलोमजार्चिता बंधमोचनी बंधुरालका ॥ १११ ॥
विमर्शरूपिणी विद्या वियदादिजगत्प्रसूः ।
सर्वव्याधिप्रशमनी सर्वमृत्युनिवारिणी ॥ ११२ ॥
अग्रगण्याऽचिंत्यरूपा कलिकल्मषनाशिनी ।
कात्यायनी कालहंत्री कमलाक्षनिषेविता ॥ ११३ ॥
तांबूलपूरितमुखी दाडिमीकुसुमप्रभा ।
मृगाक्षी मोहिनी मुख्या मृडानी मित्ररूपिणी ॥ ११४ ॥
नित्यतृप्ता भक्तनिधि–र्नियंत्री निखिलेश्वरी ।
मैत्र्यादिवासनालभ्या महाप्रळयसाक्षिणी ॥ ११५ ॥
पराशक्तिः परानिष्ठा प्रज्ञानघनरूपिणी ।

माध्वीपानालसा मत्ता मातृकावर्णरूपिणी ॥ ११६ ॥
महाकैलासनिलया मृणालमृदुदोर्लता ।
महनीया दयामूर्ति–र्महासाम्राज्यशालिनी ॥ ११७ ॥
आत्मविद्या महाविद्या श्रीविद्या कामसेविता ।
श्रीषोडशाक्षरीविद्या त्रिकूटा कामकोटिका ॥ ११८ ॥
कटाक्षकिंकरीभूतकमलाकोटिसेविता ।
शिरस्स्थिता चंद्रनिभा फालस्थे–ंद्रधनुःप्रभा ॥ ११९ ॥
हृदयस्था रविप्रख्या त्रिकोणांतरदीपिका ।
दाक्षायणी दैत्यहंत्री दक्षयज्ञविनाशिनी ॥ १२० ॥
दरांदोळितदीर्घाक्षी दरहासोज्ज्वलन्मुखी ।
गुरुमूर्ति–र्गुणनिधि–र्गोमाता गुहजन्मभूः ॥ १२१ ॥
देवेशी दंडनीतिस्था दहराकाशरूपिणी ।
प्रतिपन्मुख्यराकांततिथिमंडलपूजिता ॥ १२२ ॥
कळात्मिका कळानाथा काव्यालापविनोदिनी ।
सचामररमावाणीसव्यदक्षिणसेविता ॥ १२३ ॥
आदिशक्ति–रमेयाऽऽत्मा परमा पावनाकृतिः ।
अनेककोटिब्रह्मांडजननी दिव्यविग्रहा ॥ १२४ ॥
क्लींकारी केवला गुह्या कैवल्यपददायिनी ।
त्रिपुरा त्रिजगद्वंद्या त्रिमूर्ति–स्त्रिदशेश्वरी ॥ १२५ ॥
त्र्यक्षरी दिव्यगंधाढ्या सिंदूरतिलकांचिता ।
उमा शैलेंद्रतनया गौरी गंधर्वसेविता ॥ १२६ ॥
विश्वगर्भा स्वर्णगर्भा वरदा वागधीश्वरी ।

ध्यानगम्याऽपरिच्छेद्या ज्ञानदा ज्ञानविग्रहा ॥ १२७ ॥
सर्ववेदांतसंवेद्या सत्यानंदस्वरूपिणी ।
लोपामुद्रार्चिता लीलाक्लप्तब्रह्मांडमंडला ॥ १२८ ॥
अदृश्या दृश्यरहिता विज्ञात्री वेद्यवर्जिता ।
योगिनी योगदा योग्या योगानंदा युगंधरा ॥ १२९ ॥
इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिस्वरूपिणी ।
सर्वाधारा सुप्रतिष्ठा सदसद्रूपधारिणी ॥ १३० ॥
अष्टमूर्ति–रजाजैत्री लोकयात्राविधायिनी ।
ऐकाकिनी भूमरूपा निर्द्वैता द्वैतवर्जिता ॥ १३१ ॥
अन्नदा वसुदा वृद्धा ब्रह्मात्मैक्यस्वरूपिणी ।
बृहती ब्राह्मणी ब्राह्मी ब्रह्मानंदा बलिप्रिया ॥ १३२ ॥
भाषारूपा बृहत्सेना भावाभावविवर्जिता ।
सुखाराध्या शुभकरी शोभनासुलभागतिः ॥ १३३ ॥
राजराजेश्वरी राज्यदायिनी राज्यवल्लभा ।
राजत्कृपा राजपीठनिवेशितनिजाश्रिता ॥ १३४ ॥
राज्यलक्ष्मीः कोशनाथा चतुरंगबलेश्वरी ।
साम्राज्यदायिनी सत्यसंधा सागरमेखला ॥ १३५ ॥
दीक्षिता दैत्यशमनी सर्वलोकवशंकरी ।
सर्वार्थदात्री सावित्री सच्चिदानंदरूपिणी ॥ १३६ ॥
देशकालापरिच्छिन्ना सर्वगा सर्वमोहिनी ।
सरस्वती शास्त्रमयी गुहांबा गुह्यरूपिणी ॥ १३७ ॥
सर्वोपाधिविनिर्मुक्ता सदाशिवपतिव्रता ।

संप्रदायेश्वरी साध्वी गुरुमंडलरूपिणी ॥ १३८ ॥
कुलोत्तीर्णा भगाराध्या माया मधुमती मही ।
गणांबा गुह्यकाराध्या कोमलांगी गुरुप्रिया ॥ १३९ ॥
स्वतंत्रा सर्वतंत्रेशी दक्षिणामूर्तिरूपिणी ।
सनकादिसमाराध्या शिवज्ञानप्रदायिनी ॥ १४० ॥
चित्कळाऽऽनंदकलिका प्रेमरूपा प्रियंकरी ।
नामपारायणप्रीता नंदिविद्या नटेश्वरी ॥ १४१ ॥
मिथ्याजगदधिष्ठाना मुक्तिदा मुक्तिरूपिणी ।
लास्यप्रिया लयकरी लज्जा रंभादिवंदिता ॥ १४२ ॥
भवदावसुधावृष्टिः पापारण्यदवानला ।
दौर्भाग्यतूलवातूला जराध्वांतरविप्रभा ॥ १४३ ॥
भाग्याब्धिचंद्रिका भक्तचित्तकेकिघनाघना ।
रोगपर्वतदंभोळि–मृत्युदारुकुठारिका ॥ १४४ ॥
महेश्वरी महाकाळी महाग्रासा महाशना ।
अपर्णा चंडिका चंडमुंडासुरनिषूदिनी ॥ १४५ ॥
क्षराक्षरात्मिका सर्वलोकेशी विश्वधारिणी ।
त्रिवर्गदात्री सुभगा त्र्यंबका त्रिगुणात्मिका ॥ १४६ ॥
स्वर्गापवर्गदा शुद्धा जपापुष्पनिभाकृतिः ।
ओजोवती द्युतिधरा यज्ञरूपा प्रियव्रता ॥ १४७ ॥
दुराराध्या दुराधर्षा पाटलीकुसुमप्रिया ।
महती मेरुनिलया मंदारकुसुमप्रिया ॥ १४८ ॥
वीराराध्या विराड्रूपा विरजा विश्वतोमुखी ।

प्रत्यग्रूपा पराकाशा प्राणदा प्राणरूपिणी ॥ १४९ ॥
मार्तांडभैरवाराध्या मंत्रिणीन्यस्तराज्यधूः ।
त्रिपुरेशी जयत्सेना निस्त्रैगुण्या परापरा ॥ १५० ॥
सत्यज्ञानानंदरूपा सामरस्यपरायणा ।
कपर्दिनी कळामाला कामधुः कामरूपिणी ॥ १५१ ॥
कळानिधिः काव्यकळा रसज्ञा रसशेवधिः ।
पुष्टा पुरातना पूज्या पुष्करा पुष्करेक्षणा ॥ १५२ ॥
परंज्योतिः परंधाम परमाणुः परात्परा ।
पाशहस्ता पाशहंत्री परमंत्रविभेदिनी ॥ १५३ ॥
मूर्ताऽमूर्ता नित्यतृप्ता मुनिमानसहंसिका ।
सत्यव्रता सत्यरूपा सर्वांतर्यामिनी सती ॥ १५४ ॥
ब्रह्माणी ब्रह्मजननी बहुरूपा बुधार्चिता ।
प्रसवित्री प्रचंडाऽऽज्ञा प्रतिष्ठा प्रकटाकृतिः ॥ १५५ ॥
प्राणेश्वरी प्राणदात्री पंचाशत्पीठरूपिणी ।
विशृंखला विविक्तस्था वीरमाता वियत्प्रसूः ॥ १५६ ॥
मुकुंदा मुक्तिनिलया मूलविग्रहरूपिणी ।
भावज्ञा भवरोगघ्नी भवचक्रप्रवर्तिनी ॥ १५७ ॥
छंदस्सारा शास्त्रसारा मंत्रसारा तलोदरी ।
उदारकीर्तिरुद्दामवैभवा वर्णरूपिणी ॥ १५८ ॥
जन्ममृत्युजरातप्तजनविश्रांतिदायिनी ।
सर्वोपनिषदुद्घुष्टा शांत्यतीतकळात्मिका ॥ १५९ ॥
गंभीरा गगनांतःस्था गर्विता गानलोलुपा ।

कल्पनारहिता काष्ठाऽकांता कांतार्धविग्रहा ॥ १६० ॥
कार्यकारणनिर्मुक्ता कामकेळितरंगिता ।
कनत्कनकताटंका लीलाविग्रहधारिणी ॥ १६१ ॥
अजा क्षयविनिर्मुक्ता मुग्धा क्षिप्रप्रसादिनी ।
अंतर्मुखसमाराध्या बहिर्मुखसुदुर्लभा ॥ १६२ ॥
त्रयी त्रिवर्गनिलया त्रिस्था त्रिपुरमालिनी ।
निरामया निरालंबा स्वात्मारामा सुधासृतिः ॥ १६३ ॥
संसारपंकनिर्मग्नसमुद्धरणपंडिता ।
यज्ञप्रिया यज्ञकर्त्री यजमानस्वरूपिणी ॥ १६४ ॥
धर्माधारा धनाध्यक्षा धनधान्यविवर्धिनी ।
विप्रप्रिया विप्ररूपा विश्वभ्रमणकारिणी ॥ १६५ ॥
विश्वग्रासा विद्रुमाभा वैष्णवी विष्णुरूपिणी ।
अयोनिर् योनिनिलया कूटस्था कुलरूपिणी ॥ १६६ ॥
वीरगोष्ठीप्रिया वीरा नैष्कर्म्या नादरूपिणी ।
विज्ञानकलना कल्या विदग्धा बैंदवासना ॥ १६७ ॥
तत्त्वाधिका तत्त्वमयी तत्त्वमर्थस्वरूपिणी ।
सामगानप्रिया सौम्या सदाशिवकुटुंबिनी ॥ १६८ ॥
सव्यापसव्यमार्गस्था सर्वापद्विनिवारिणी ।
स्वस्था स्वभावमधुरा धीरा धीरसमर्चिता ॥ १६९ ॥
चैतन्यार्घ्यसमाराध्या चैतन्यकुसुमप्रिया ।
सदोदिता सदातुष्टा तरुणादित्यपाटला ॥ १७० ॥
दक्षिणादक्षिणाराध्या दरस्मेरमुखांबुजा ।

कौळिनीकेवलाऽनर्घ्यकैवल्यपददायिनी ॥ १७१ ॥
स्तोत्रप्रिया स्तुतिमती श्रुतिसंस्तुतवैभवा ।
मनस्विनी मानवती महेशी मंगळाकृतिः ॥ १७२ ॥
विश्वमाता जगद्धात्री विशालाक्षी विरागिणी ।
प्रगल्भा परमोदारा परामोदा मनोमयी ॥ १७३ ॥
व्योमकेशी विमानस्था वज्रिणी वामकेश्वरी ।
पंचयज्ञप्रिया पंचप्रेतमंचाधिशायिनी ॥ १७४ ॥
पंचमी पंचभूतेशी पंचसंख्योपचारिणी ।
शाश्वती शाश्वतैश्वर्या शर्मदा शंभुमोहिनी ॥ १७५ ॥
धरा धरसुता धन्या धर्मिणी धर्मवर्धिनी ।
लोकातीता गुणातीता सर्वातीता शमात्मिका ॥ १७६ ॥
बंधूककुसुमप्रख्या बाला लीलाविनोदिनी ।
सुमंगळी सुखकरी सुवेषाढ्या सुवासिनी ॥ १७७ ॥
सुवासिन्यर्चनप्रीताऽऽशोभना शुद्धमानसा ।
बिंदुतर्पणसंतुष्टा पूर्वजा त्रिपुरांबिका ॥ १७८ ॥
दशमुद्रासमाराध्या त्रिपुराश्रीवशंकरी ।
ज्ञानमुद्रा ज्ञानगम्या ज्ञानज्ञेयस्वरूपिणी ॥ १७९ ॥
योनिमुद्रा त्रिखंडेशी त्रिगुणांबा त्रिकोणगा ।
अनघाऽद्भुतचारित्रा वांछितार्थप्रदायिनी ॥ १८० ॥
अभ्यासातिशयज्ञाता षडध्वातीतरूपिणी ।
अव्याजकरुणामूर्ति–रज्ञानध्वांतदीपिका ॥ १८१ ॥
आबालगोपविदिता सर्वानुल्लंघ्यशासना ।

श्रीचक्रराजनिलया श्रीमत्त्रिपुरसुंदरी ॥ १८२ ॥
श्रीशिवा शिवशक्त्यैक्यरूपिणी ललितांबिका ।
ऐवं श्रीललितादेव्या नाम्नां साहस्रकं जगुः ।

॥ इति श्रीब्रह्मांडपुराणे उत्तरखंडे श्रीहयग्रीवागस्त्यसंवादे श्रीललिता सहस्रनाम स्तोत्रकथनं सम्पूर्णं ॥

## श्री ललित अष्टोत्तर शतनामावळि

ॐ–ऐं–ह्रीं–श्रीं ।

रजताचलशृंगाग्रमध्यस्थायै नमो नमः ।
हिमाचलमहावंशपावनायै नमो नमः ॥ १ ॥
शंकरार्धांगसौंदर्यलावण्यायै नमो नमः ।
लसन्मरकतस्वच्छविग्रहायै नमो नमः ॥ २ ॥
महातिशयसौंदर्यलावण्यायै नमो नमः ।
शशांकशेखरप्राणवल्लभायै नमो नमः ॥ ३ ॥
सदापंचदशात्मैक्यस्वरूपायै नमो नमः ।
वज्रमाणिक्यकटककिरीटायै नमो नमः ॥ ४ ॥
कस्तूरीतिलकोल्लासनिटलायै नमो नमः ।
भस्मरेखांकितलसन्मस्तकायै नमो नमः ॥ ५ ॥
विकचांभोरुहदळलोचनायै नमो नमः ।
शरच्चांपेयपुष्पाभनासिकायै नमो नमः ॥ ६ ॥
लसत्कांचनताटंकयुगळायै नमो नमः ।
मणिदर्पणसंकाशकपोलायै नमो नमः ॥ ७ ॥
तांबूलपूरितस्मेरवदनायै नमो नमः ।
सुपक्वदाडिमीबीजरदनायै नमो नमः ॥ ८ ॥
कंबुपूगसमच्छायकंधरायै नमो नमः ।

स्थूलमुक्ताफलोदारसुहारायै नमो नमः ॥ ९ ॥
गिरीशबद्धमांगल्यमंगळायै नमो नमः ।
पद्मपाशांकुशलसत्कराब्जायै नमो नमः ॥ १० ॥
पद्मकैरवमंदारसुमालिन्यै नमो नमः ।
सुवर्णकुंभयुग्माभसुकुचायै नमो नमः ॥ ११ ॥
रमणीयचतुर्बाहुसंयुक्तायै नमो नमः ।
कनकांगदकेयूरभूषितायै नमो नमः ॥ १२ ॥
बृहत्सौवर्णसौंदर्यवसनायै नमो नमः ।
बृहन्नितंबविलसज्जघनायै नमो नमः ॥ १३ ॥
सौभाग्यजातशृंगारमध्यमायै नमो नमः ।
दिव्यभूषणसंदोहरंजितायै नमो नमः ॥ १४ ॥
पारिजातगुणाधिक्यपदाब्जायै नमो नमः ।
सुपद्मरागसंकाशचरणायै नमो नमः ॥ १५ ॥
कामकोटिमहापद्मपीठस्थायै नमो नमः ।
श्रीकंठनेत्रकुमुदचंद्रिकायै नमो नमः ॥ १६ ॥
सचामररमावाणीवीजितायै नमो नमः ।
भक्तरक्षणदाक्षिण्यकटाक्षायै नमो नमः ॥ १७ ॥
भूतेशालिंगनोद्भूतपुलकांग्यै नमो नमः ।
अनंगजनकापांगवीक्षणायै नमो नमः ॥ १८ ॥
ब्रह्मोपेंद्रशिरोरत्नरंजितायै नमो नमः ।
शचीमुख्यामरवधूसेवितायै नमो नमः ॥ १९ ॥
लीलाकल्पितब्रह्मांडमंडलायै नमो नमः ।

अमृतादिमहाशक्तिसंवृतायै नमो नमः ॥ २० ॥
ऐकातपत्रसाम्राज्यदायिकायै नमो नमः ।
सनकादिसमाराध्यपादुकायै नमो नमः ॥ २१ ॥
देवर्षिभिस्स्तूयमानवैभवायै नमो नमः ।
कलशोद्भवदुर्वासःपूजितायै नमो नमः ॥ २२ ॥
मत्तेभवक्त्रषड्वक्त्रवत्सलायै नमो नमः ।
चक्रराजमहायंत्रमध्यवर्त्यै नमो नमः ॥ २३ ॥
चिदग्निकुंडसंभूतसुदेहायै नमो नमः ।
शशांकखंडसंयुक्तमकुटायै नमो नमः ॥ २४ ॥
मत्तहंसवधूमंदगमनायै नमो नमः ।
वंदारुजनसंदोहवंदितायै नमो नमः ॥ २५ ॥
अंतर्मुखजनानंदफलदायै नमो नमः ।
पतिव्रतांगनाभीष्टफलदायै नमो नमः ॥ २६ ॥
अव्याजकरुणापूरपूरितायै नमो नमः ।
नितांतसच्चिदानंदसंयुक्तायै नमो नमः ॥ २७ ॥
सहस्रसूर्यसंयुक्तप्रकाशायै नमो नमः ।
रत्नचिंतामणिगृहमध्यस्थायै नमो नमः ॥ २८ ॥
हानिवृद्धिगुणाधिक्यरहितायै नमो नमः ।
महापद्माटवीमध्यनिवासायै नमो नमः ॥ २९ ॥
जाग्रत्स्वप्नसुषुप्तीनां साक्षिभूत्यै नमो नमः ।
महापापौघपापानां विनाशिन्यै नमो नमः ॥ ३० ॥

दुष्टभीतिमहाभीतिभंजनायै नमो नमः ।
समस्तदेवदनुजप्रेरिकायै नमो नमः ॥ ३१ ॥
समस्तहृदयांभोजनिलयायै नमो नमः ।
अनाहतमहापद्ममंदिरायै नमो नमः ॥ ३२ ॥
सहस्रारसरोजातवासितायै नमो नमः ।
पुनरावृत्तिरहितपुरस्थायै नमो नमः ॥ ३३ ॥
वाणीगायत्रीसावित्रीसन्नुतायै नमो नमः ।
रमाभूमिसुताराध्यपदाब्जायै नमो नमः ॥ ३४ ॥
लोपामुद्रार्चितश्रीमच्चरणायै नमो नमः ।
सहस्ररतिसौंदर्यशरीरायै नमो नमः ॥ ३५ ॥
भावनामात्रसंतुष्टहृदयायै नमो नमः ।
सत्यसंपूर्णविज्ञानसिद्धिदायै नमो नमः ॥ ३६ ॥
श्रीलोचनकृतोल्लासफलदायै नमो नमः ।
श्रीसुधाब्धिमणिद्वीपमध्यगायै नमो नमः ॥ ३७ ॥
दक्षाध्वरविनिर्भेदसाधनायै नमो नमः ।
श्रीनाथसोदरीभूतशोभितायै नमो नमः ॥ ३८ ॥
चंद्रशेखरभक्तार्तिभंजनायै नमो नमः ।
सर्वोपाधिविनिर्मुक्तचैतन्यायै नमो नमः ॥ ३९ ॥
नामपारयणाभीष्टफलदायै नमो नमः ।
सृष्टिस्थितितिरोधानसंकल्पायै नमो नमः ॥ ४० ॥
श्रीषोडशाक्षरीमंत्रमध्यगायै नमो नमः ।
अनाद्यंतस्वयंभूतदिव्यमूर्त्यै नमो नमः ॥ ४१ ॥

भक्तहंसपरीमुख्यवियोगायै नमो नमः ।
मातृमंडलसंयुक्तललितायै नमो नमः ॥ ४२ ॥
भंडदैत्यमहासत्त्वनाशनायै नमो नमः ।
क्रूरभंडशिरच्छेदनिपुणायै नमो नमः ॥ ४३ ॥
धात्रच्युतसुराधीशसुखदायै नमो नमः ।
चंडमुंडनिशुंभादिखंडनायै नमो नमः ॥ ४४ ॥
रक्ताक्षरक्तजिह्वादिशिक्षणायै नमो नमः ।
महिषासुरदोर्वीर्यनिग्रहायै नमो नमः ॥ ४५ ॥
अभ्रकेशमहोत्साहकारणायै नमो नमः ।
महेशयुक्तनटनतत्परायै नमो नमः ॥ ४६ ॥
निजभर्तृमुखांभोजचिंतनायै नमो नमः ।
वृषभध्वजविज्ञानभावनायै नमो नमः ॥ ४७ ॥
जन्ममृत्युजरारोगभंजनायै नमो नमः ।
विधेयमुक्तविज्ञनसिद्धिदायै नमो नमः ॥ ४८ ॥
कामक्रोधादिषड्वर्गनाशनायै नमो नमः ।
राजराजार्चितपदसरोजायै नमो नमः ॥ ४९ ॥
सर्ववेदांतसंसिद्धसुतत्त्वायै नमो नमः ।
श्रीवीरभक्तविज्ञानविधानायै नमो नमः ॥ ५० ॥
अशेषदुष्टदनुजसूदनायै नमो नमः ।
साक्षाच्छ्रीदक्षिणामूर्तिमनोज्ञायै नमो नमः ॥ ५१ ॥
हयमेधाग्रसंपूज्यमहिमायै नमो नमः ।
दक्षप्रजापतिसुतवेषाढ्यायै नमो नमः ॥ ५२ ॥

सुमबाणेक्षुकोदंडमंडितायै नमो नमः ।
नित्ययौवनमांगल्यमंगळायै नमो नमः ॥ ५३ ॥
महादेवसमायुक्तशरीरायै नमो नमः ।
चतुर्विंशतितत्त्वैक्यस्वरूपायै नमो नमः ॥ ५४ ॥

# महिषासुर मर्दिनी स्तोत्रं

अयि गिरि नन्दिनि, नन्दित मेदिनि, विश्व विनोदिनि, नन्दनुते ॥
गिरि वर विन्ध्य शिरोधि निवासिनि विष्णुविलासिनि जिष्णुनुते ॥
भगवति हे शितिकंठकुटुम्बिनि भूरिकुटुम्बिनि भूरिकृते ॥
जय जय हे महिषासुरमर्धिनि रम्यकपर्दिनि शैलसुते ॥
सुरवरवर्षिणि दुर्धरधर्षिणि दुर्मुखमर्षिणि हर्षरते ॥
त्रिभुवनपोषिणि शंकरतोषिणि किल्बिशमोषिणि मोहरते ॥
दनुजनिरोषिणि दितिसुतरोषिणि दुर्मदशोषिणि सिंधुनुते ॥
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
अयि जगदंब मदंब कदंबवनप्रियवासिनि हासरते ॥
शिखरिशिरोमणि तुंगहिमालय शृंगनिजालय मध्यगते ॥
मधुमधुरे मधुकैटभभंन्जनि कैटभगन्जिनि रासरते ॥
जय जय हे महिषासुरमर्धिनि रम्यकपर्दिनि शैलसुते ॥
अयि शतखण्द विखण्दितरुण्द वितुंडितशुंड गजाधिपते ॥
रिपुगजगंड विदारणडंद पराक्रमशुंड मृगाधिपते ॥
निजभुजदंड निपातितचंड विपातितमुंड भटाधिपते ॥
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
अयि रणदुर्मदशत्रुवधोदित दुर्धरनिर्जर शक्तिभृते ॥
चतुरविचार धुरीण महशिव दूतकृत प्रमथाधिपते ॥
दुरितदुरीह दुराशयदुर्मति दानवदूत कृतांतमते ॥

जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
अयि शरणागत वैरिवधूवर वीरवराभयदायकरे ॥
त्रिभुवनमस्तक शूलविरोधिशिरोधिकृतामल शूलकरे ॥
दुमिदुमितामर दुन्दुभिनाद महोमुखरीकृत तिग्मकरे ॥
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
अयि निजहुंकृति मात्रनिराकृत धूम्रविलोचन धूम्रशते ॥
समरविशोषित शोणितबीज समुद्भवशोणित बीजलते ॥
शिव शिव शुम्भ निशुंभ महाहवतर्पित भूतपिशाचरते ॥
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
धनुरनुषंगरणक्षणसंग परिस्फुरदन्गनटत्कटके ॥
कनकपिशंग पृशत्क निषन्ग रसद्भटशृंग हतावटुके ॥
क्रुतचतुरंग बलक्षितिरंग घटद्बहुरंग रटद्बटुके ॥
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
जय जय जप्यजये जयशब्द परस्तुति तत्पर विश्वनुते ॥
झण झण झिंझिमि झुंकृतनूपुर सिन्जितमोहित भूतपते ॥
नटित नटार्ध नटीनटनायक नाटितनाट्य सुगानरते ॥
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
अयि सुमनस्सुमनह् सुमनह् सुमनोहरकान्तियुते ॥
श्रित रजनी रजनी रजनी रजनी रजनीकरवक्रवृते ॥
सुनयन विभ्रमर भ्रमर भ्रमर भ्रमर भ्रमराधिपते॥
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
सहितमहाहव मल्लमतल्लिक मल्लितरल्लक मल्लरते॥

विरचितवल्लिक पल्लिकमल्लिक झिल्लिक झिल्लिक वर्गवृते ॥
सित क्रुत फुल्लसमुल्ल सितारुण तल्लज पल्लवसल्लिलते ॥
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
अविरळगंड गलन्मदमेदुर मत्तमतंगजराजपते ॥
त्रिभुवन भूषण भूतकळानिधि रूपयोनिधिराजनुते ॥
अयि सुदतीजन लालसमानस मोहनमन्मथराजनुते ॥
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
कमलदळामलकोमल कांतिकळाकलितामल बाललते ॥
सकलविलासकळानिलयक्रम केळिचलत्कलहंसकुले ॥
अळिकुलसंकुल कुवलयमंडल मौळिमिलद्बकुलाळिकुले ॥
जय जय हे महिशासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
करमुरळीरव वीजित कूजित लज्जित कोकिल मंजुमते ॥
मिळितपुळिंद मनोहरगुंजित रंजितशैलनिकुंजगते ॥
निजगुणभूत महाशबरीगण सद्गुणसंभ्रुत केळितले ॥
जय जय हे महिशासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
कटितटपीतदुकूल विचित्र मयूख तिरस्कृत चंद्ररुचे॥
प्रणतसुरासुर मौळिमणिस्फुरदंशु लसन्नख चंद्ररुचे॥
जितकनकाचल मौळिपदोर्जित निर्जरकुन्जर कुम्भकुचे ॥
जय जय हे महिशासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
विजितसहस्र करैकसहस्र करैकसहस्र करैकनुते ॥
कृतसुरतारक संगरतारक संगरतारक सूनुनुते ॥
सुरथसमाधि समानसमाधि समाधि समाधि सुजातरते ॥

जय जय हे महिशासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
पदकमलं करुणानिलये वरिवस्यति योनुदिनं सशिवे ॥
अयि कमले कमलानिलये कमलानिलयः सकथं न भवेत् ॥
तव पदमेव परं पदमित्यनुशीलयतो मम किं न शिवे ॥
जय जय हे महिशासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
कनकलसत्कल सिन्धुजलैरनुसिंचिनुते गुणरंगभुवं ॥
भजति स किं न शचीकुचकुंभ तटीपरिरंभ सुखानुभवम् ॥
तव चरणं शरणं करवाणि नतामरवाणि निवासिसिवम् ॥
जय जय हे महिशासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
तव विमलेन्दुकळम् वदनेन्दु मलं सकलं ननु कूलयते ॥
किमु पुरुहूत पुरीन्दुमुखीसुमुखीभिरसौ विमुखीक्रियते ॥
मम तु मतं शिवनामधने भवती कृपया किमुत क्रियते ॥
जय जय हे महिशासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
अयि मयि दीनदयाळु तया कृपयैव त्वया भवितव्यमुमे ॥
अयि जगतो जननी कृपयासि यथासि तथानुमितासिरते ॥
यदुचितमत्र भवत्युररीकृतादुरुताप मपाकुरुते ॥
जय जय हे महिशासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

## ललितासहस्रनामावळि

ॐ
ॐ ऐं ह्रीं श्रीं
अस्य श्री ललिता सहस्रनाम स्तोत्र महामन्त्रस्य
वशिन्यादि वाग्देवता ऋषयः अनुष्टुप् छन्दः
श्री ललिता परमेश्वरी देवता श्रीमद् वाग्भव–
कुटेतिबीजं मध्यकूटेति शक्तिः शक्तिकूटेति कीलकं
श्री ललिता परमेश्वरी प्रसाद सिध्यर्धे जपे विनियोगः

## ध्यानं

सिन्दूरारुण विग्रहां त्रिनयनां माणिक्यमौलिस्फुरत्–
तारानायक शेखरां स्मितमुखीं आपीनवक्षोरुहां
पाणिभ्यामळिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं
सौम्यां रत्नघटस्थरक्तचरणां ध्यायेत् परामंबिकां

अरुणां करुणातरङ्गिताक्षिं
धृतपाशान्ङ्कुश पुष्पबाणचापां
अणिमादिभिरावृतां मयूखै

रहमित्येव विभावये भवानिं

ध्यायेत् पद्मासनस्थां विकसित वदनां पद्मपत्रायताक्षिं
हेमांभां पीतवस्त्रां करकलितलसत् हेमपद्मां वरांगीं
सर्वालङ्कारयुक्तां सततमभयदां भक्तनम्रां भवानीं
श्रीविद्यां शान्तमूर्तिं सकल सुरनुतां सर्वसंपत्प्रदात्रीं

सकुङ्कुमविलेपनामलिकचुंबिकस्तूरिकां
समन्दहसितेक्षणां सशरचापपाशाङ्कुशां
अशेषजनमोहीनीमरुणमाल्यभूषोज्वलां
जपाकुसुमभासुरां जपविधौ स्मरेदंबिकां

**<u>सहस्र नामावळि</u>**

ॐ श्रीमात्रे नमः

ॐ श्रीमहाराज्ञ्यै नमः
ॐ श्रीमत्सिंहासनॆश्वर्यै नमः
ॐ चिदग्निकुण्डसंभूतायै नमः
ॐ दॆवकार्यसमुद्यतायै नमः
ॐ उद्यद्भानुसहस्राभायै नमः
ॐ चतुर्बाहुसमन्वितायै नमः
ॐ रागस्वरूपपाशाढ्यायै नमः
ॐ क्रॊधाकाराङ्कुशॊज्वलायै नमः
ॐ मनॊरूपॆक्षुकॊदण्डायै नमः 10
ॐ पञ्चतन्मात्रसायकायै नमः
ॐ निजारुणप्रभापूरमज्जत्ब्रह्माण्डमण्डलायै नमः
ॐ चंपकाशॊकपुन्नागसौगन्धिकलसत्कचायै नमः
ॐ कुरुविन्दमणिश्रॆणीकनत्कॊटीरमण्डितायै नमः
ॐ अष्टमीचन्द्रविभ्राजदळिकस्थलशॊभितायै नमः
ॐ मुखचन्द्रकळङ्काभमृगनाभिविशॆषकायै नमः
ॐ वदनस्मरमांगल्यगृहतॊरणचिल्लिकायै नमः
ॐ वक्त्रलक्ष्मीपरीवाहचलन्मीनाभलॊचनायै नमः
ॐ नवचंपकपुष्पाभनासादण्डविराजितायै नमः
ॐ ताराकान्तितिरस्कारिनासाभरणभासुरायै नमः 20
ॐ कदंबमञ्जरीक्लुप्तकर्णपूरमनॊहरायै नमः
ॐ ताटङ्कयुगळीभूततपनॊडुपमण्डलायै नमः
ॐ पद्मरागशिलादर्शपरिभाविकपॊलभुवॆ नमः

ॐ नवविद्रुमबिंबश्रीन्यक्कारिरदनच्छदायै नमः
ॐ शुद्धविद्याङ्कुराकारद्विजपङ्क्तिद्वयोज्ज्वलायै नमः
ॐ कर्पूरवीटिकामोदसमाकर्षद्दिगन्तरायै नमः
ॐ निजसल्लापमाधुर्यविनिर्भर्त्सितकच्छप्यै नमः
ॐ मन्दस्मितप्रभापूरमज्जत्कामेशमानसायै नमः
ॐ अनाकलितसादृश्यचुबुकश्रीविराजितायै नमः
ॐ कामेशबद्धमांगल्यसूत्रशोभितकन्धरायै नमः 30
ॐ कनकांगदकेयूरकमनीयभुजान्वितायै नमः
ॐ रत्नग्रैवेयचिन्ताकलोलमुक्ताफलान्वितायै नमः
ॐ कामेश्वरप्रेमरत्नमणिप्रतिपणस्तन्यै नमः
ॐ नाभ्यालवालरोमाळिलताफलकुचद्वयायै नमः
ॐ लक्ष्यरोमलताधारतासमुन्नेयमध्यमायै नमः
ॐ स्तनभारदळन्मध्यपट्टबन्धवलित्रयायै नमः
ॐ अरुणारुणकौसुंभवस्त्रभास्वत्कटीतट्यै नमः
ॐ रत्नकिंकिणिकारम्यरशनादामभूषितायै नमः
ॐ कामेशज्ञातसौभाग्यमार्दवोरुद्वयान्वितायै नमः
ॐ माणिक्यमकुटाकारजानुद्वयविराजितायै नमः 40
ॐ इंद्रगोपपरिक्षिप्तस्मरतूणाभजंखिकायै नमः
ॐ गूडगुल्फायै नमः
ॐ कूर्मपृष्ठजयिष्णुप्रपदान्वितायै नमः
ॐ नखदीधितिसंछन्ननमज्जनतमोगुणायै नमः
ॐ पदद्वयप्रभाजालपराकृतसरोरुहायै नमः

ॐ शिञ्जानमणिमञ्जीरमण्डितश्रीपदांबुजायै नमः
ॐ मराळीमन्दगमनायै नमः
ॐ महालावण्यशेवधये नमः
ॐ सर्वारुणायै नमः
ॐ अनवद्यांग्यै नमः 50
ॐ सर्वाभरणभूषितायै नमः
ॐ शिवकामेश्वराङ्कस्थायै नमः
ॐ शिवायै नमः
ॐ स्वाधीनवल्लभायै नमः
ॐ सुमेरुशृंगमध्यस्थायै नमः
ॐ श्रीमन्नगरनायिकायै नमः
ॐ चिन्तामणीगृहान्तस्थायै नमः
ॐ पञ्चब्रह्मासनस्थितायै नमः
ॐ महापद्माटवीसंस्थायै नमः
ॐ कदंबवनवासिन्यै नमः 60
ॐ सुधासागरमध्यस्थायै नमः
ॐ कामाक्ष्यै नमः
ॐ कामदायिन्यै नमः
ॐ देवर्षिगणसंघातस्तूयमानात्मवैभवायै नमः
ॐ भण्डासुरवधोद्युक्तशक्तिसेनासमन्वितायै नमः
ॐ संपत्करीसमारुढसिन्धुरव्रजसेवितायै नमः
ॐ अश्वारूढाधिष्ठिताश्वकोटिकोटिभिरावृतायै नमः

ॐ चक्रराजरथारूढसर्वायुधपरिष्कृतायै नमः
ॐ गेयचक्ररथारूढमन्त्रिणीपरिसेवितायै नमः
ॐ किरिचक्ररथारूढदंडनाथापुरस्कृतायै नमः 70
ॐ ज्वालामालिनिकाक्षिप्तवह्निप्राकारमध्यगायै नमः
ॐ भण्डसैन्यवधोद्युक्तशक्तिविक्रमहर्षितायै नमः
ॐ नित्यापराक्रमाटोपनिरीक्षणसमुत्सुकायै नमः
ॐ भण्डपुत्रवधोद्युक्तबालाविक्रमनन्दितायै नमः
ॐ मान्त्रिण्यंबाविरचितविषंगवधतोषितायै नमः
ॐ विशुक्रप्राणहरणावाराहीवीर्यनन्दितायै नमः
ॐ कामेश्वरमुखालोककल्पितश्रीगणेश्वरायै नमः
ॐ महागणेशनिर्भिन्नविघ्नयन्त्रप्रहर्षितायै नमः
ॐ भण्डासुरेन्द्रनिर्म्मुक्तशस्त्रप्रत्यस्त्रवर्षिण्यै नमः
ॐ करांगुलीनखोत्पन्ननारायणदशाकृत्यै नमः 80
ॐ महापाशुपतास्त्राग्निनिर्दग्धासुरसैनिकायै नमः
ॐ कामेश्वरास्त्रनिर्दग्धसभण्डासुरशून्यकायै नमः
ॐ ब्रह्मोपेन्द्रमहेन्द्रादिदेवसंस्तुतवैभवायै नमः
ॐ हरनेत्राग्निसंदग्धकामसञ्जीवनौषध्यै नमः
ॐ श्रीमद्वाग्भवकुटैकस्वरूपमुखपङ्कजायै नमः
ॐ कण्ठाधःकटिपर्यन्तमध्यकूटस्वरूपिण्यै नमः
ॐ शक्तिकूटैकतापन्नकट्यधोभागधारिण्यै नमः
ॐ मूलमन्त्रात्मिकायै नमः
ॐ मूलकूटत्रयकळेबरायै नमः

ॐ कुलामृतैकरसिकायै नमः 90

ॐ कुलसङ्केतपालिन्यै नमः

ॐ कुलांगनायै नमः

ॐ कुलान्तस्थायै नमः

ॐ कौलिन्यै नमः

ॐ कुलयोगिन्यै नमः

ॐ अकुलायै नमः

ॐ समयान्तस्थायै नमः

ॐ समयाचारतत्परायै नमः

ॐ मूलाधारैकनिलयायै नमः

ॐ ब्रह्मग्रन्थिविभेदिन्यै नमः 100

ॐ मणिपूरान्तरुदितायै नमः

ॐ विष्णुग्रन्थिविभेदिन्यै नमः

ॐ आज्ञाचक्रान्तराळस्थायै नमः

ॐ रुद्रग्रन्थिविभेदिन्यै नमः

ॐ सहस्रारांबुजारूढायै नमः

ॐ सुधासाराभिवर्षिण्यै नमः

ॐ तटिल्लतासमरुच्यै नमः

ॐ षट्चक्रोपरिसंस्थितायै नमः

ॐ महाशक्त्यै नमः

ॐ कुण्डलिन्यै नमः 110

ॐ बिसतन्तुतनीयस्यै नमः

ॐ भवान्यै नमः
ॐ भावनागम्यायै नमः
ॐ भवारण्यकुठारिकायै  नमः
ॐ भद्रप्रियायै नमः
ॐ भद्रमूर्त्यै नमः
ॐ भक्तसौभाग्यदायिन्यै नमः
ॐ भक्तिप्रियायै नमः
ॐ भक्तिगम्यायै नमः
ॐ भक्तिवश्यायै नमः 120
ॐ भयापहायै नमः
ॐ शांभव्यै नमः
ॐ शारदाराध्यायै नमः
ॐ शर्वाण्यै नमः
ॐ शर्मदायिन्यै नमः
ॐ शांकर्यै नमः
ॐ श्रीकर्यै नमः
ॐ साद्ध्यै नमः
ॐ शरच्चन्द्रनिभाननायै नमः
ॐ शातोदर्यै नमः 130
ॐ शान्तिमत्यै नमः
ॐ निराधारायै नमः
ॐ निरञ्जनायै नमः

ॐ निर्लेपायै नमः
ॐ निर्मलायै नमः
ॐ नित्यायै नमः
ॐ निराकारायै नमः
ॐ निराकुलायै नमः
ॐ निर्गुणायै नमः
ॐ निष्कळायै नमः 140
ॐ शान्तायै नमः
ॐ निष्कामायै नमः
ॐ निरुपप्लवायै नमः
ॐ नित्यमुक्तायै नमः
ॐ निर्विकारायै नमः
ॐ निष्प्रपंचायै नमः
ॐ निराश्रयायै नमः
ॐ नित्यशुद्धायै नमः
ॐ नित्यबुद्धायै नमः
ॐ निरवद्यायै नमः 150
ॐ निरंतरायै नमः
ॐ निष्कारणायै नमः
ॐ निष्कळङ्कायै नमः
ॐ निरुपाधये नमः
ॐ निरीश्वरायै नमः

ॐ नीरागायै नमः
ॐ रागमथनायै नमः
ॐ निर्मदायै नमः
ॐ मदनाशिन्यै नमः
ॐ निश्चिन्तायै नमः 160
ॐ निरहङ्कारायै नमः
ॐ निर्मोहायै नमः
ॐ मोहनाशिन्यै नमः
ॐ निर्ममायै नमः
ॐ ममताहन्त्र्यै नमः
ॐ निष्पापायै नमः
ॐ पापनाशिन्यै नमः
ॐ निष्क्रोधायै नमः
ॐ क्रोधशमन्यै नमः
ॐ निर्लोभायै नमः 170
ॐ लोभनाशिन्यै नमः
ॐ निस्संशयायै नमः
ॐ संशयघ्न्यै नमः
ॐ निर्भवायै नमः
ॐ भवनाशिन्यै नमः
ॐ निर्विकल्पायै नमः
ॐ निराबाधायै नमः

ॐ निर्भेदायै नमः
ॐ भेदनाशिन्यै नमः
ॐ निर्न्नाशायै नमः 180
ॐ मृत्युमथन्यै नमः
ॐ निष्क्रियायै नमः
ॐ निष्परिग्रहायै नमः
ॐ निस्तुलायै नमः
ॐ नीलचिकुरायै नमः
ॐ निरपायायै नमः
ॐ निरत्ययायै नमः
ॐ दुर्लभायै नमः
ॐ दुर्गमायै नमः
ॐ दुर्गायै नमः 190
ॐ दुःखहन्त्र्यै नमः
ॐ सुखप्रदायै नमः
ॐ दुष्टदूरायै नमः
ॐ दुराचारशमन्यै नमः
ॐ दोषवर्जितायै नमः
ॐ सर्वज्ञायै नमः
ॐ सान्द्रकरुणायै नमः
ॐ समानाधिकवर्जितायै नमः
ॐ सर्वशक्तिमय्यै नमः

ॐ सर्वमंगळायै नमः 200
ॐ सद्गतिप्रदायै नमः
ॐ सर्वेश्वर्यै नमः
ॐ सर्वमय्यै नमः
ॐ सर्वमन्त्रस्वरूपिण्यै नमः
ॐ सर्वयन्त्रात्मिकायै नमः
ॐ सर्वतन्त्ररूपायै नमः
ॐ मनोॅन्मन्यै नमः
ॐ माहेॅश्वर्यै नमः
ॐ महादेॅव्यै नमः
ॐ महालक्ष्म्यै नमः 210
ॐ मृडप्रियायै नमः
ॐ महारूपायै नमः
ॐ महापूज्यायै नमः
ॐ महापातकनाशिन्यै नमः
ॐ महामायायै नमः
ॐ महासत्वायै नमः
ॐ महशक्त्यै नमः
ॐ महारत्यै नमः
ॐ महाभोॅगायै नमः
ॐ महैश्वर्यायै नमः 220
ॐ महावीर्यायै नमः

ॐ महाबलायै नमः
ॐ महाबुद्ध्यै नमः
ॐ महासिद्ध्यै नमः
ॐ महायोगेश्वरेश्वर्यै नमः
ॐ महातन्त्रायै नमः
ॐ महामन्त्रायै नमः
ॐ महायन्त्रायै नमः
ॐ महासनायै नमः
ॐ महायागक्रमाराध्यायै नमः 230
ॐ महभैरवपूजितायै नमः
ॐ महेश्वरमहाकल्पमहाताण्डवसाक्षिण्यै नमः
ॐ महाकामेशमहिष्यै नमः
ॐ महात्रिपुरसुन्दर्यै नमः
ॐ चतुःषष्ट्युपचाराढ्यायै नमः
ॐ चतुःषष्टिकलामय्यै नमः
ॐ महाचतुःषष्टिकोटियोगिनीगणसेवितायै नमः
ॐ मनुविद्यायै नमः
ॐ चन्द्रविद्यायै नमः
ॐ चन्द्रमण्डलमध्यगायै नमः 240
ॐ चारुरूपायै नमः
ॐ चारुहासायै नमः
ॐ चारुचन्द्रकलाधरायै नमः

ॐ चराचरजगन्नाथायै नमः
ॐ चक्रराजनिकेतनायै नमः
ॐ पार्वत्यै नमः
ॐ पद्मनयनायै नमः
ॐ पद्मरागसमप्रभायै नमः
ॐ पञ्चप्रेतासनासीनायै नमः
ॐ पञ्चब्रह्मस्वरूपिण्यै नमः 250
ॐ चिन्मयै नमः
ॐ परमानन्दायै नमः
ॐ विज्ञानघनरूपिण्यै नमः
ॐ ध्यानध्यातृध्येयरूपायै नमः
ॐ धर्माधर्मविवर्जितायै नमः
ॐ विश्वरूपायै नमः
ॐ जागरिण्यै नमः
ॐ स्वपन्त्यै नमः
ॐ तैजसात्मिकायै नमः
ॐ सुप्तायै नमः 260
ॐ प्रज्ञात्मिकायै नमः
ॐ तुर्यायै नमः
ॐ सर्वावस्थाविवर्जितायै नमः
ॐ सृष्टिकर्त्र्यै नमः
ॐ ब्रह्मरूपायै नमः

ॐ गोप्त्र्यै नमः
ॐ गोविन्दरूपिण्यै नमः
ॐ संहारिण्यै नमः
ॐ रुद्ररूपायै नमः
ॐ तिरोधानकर्यै नमः 270
ॐ ईश्वर्यै नमः
ॐ सदाशिवायै नमः
ॐ अनुग्रहदायै नमः
ॐ पञ्चकृत्यपरायणायै नमः
ॐ भानुमण्डलमध्यस्थायै नमः
ॐ भैरव्यै नमः
ॐ भगमालिन्यै नमः
ॐ पद्मासनायै नमः
ॐ भगवत्यै नमः
ॐ पद्मनाभसहोदर्यै नमः 280
ॐ उन्मेषनिमिषोत्पन्नविपन्नभुवनावळ्यै नमः
ॐ सहस्रशीर्षवदनायै नमः
ॐ सहस्राक्ष्यै नमः
ॐ सहस्रपादे नमः
ॐ आब्रह्मकीटजनन्यै नमः
ॐ वर्णाश्रमविधायिन्यै नमः
ॐ निजाज्ञारूपनिगमायै नमः

ॐ पुण्यापुण्यफलप्रदायै नमः
ॐ श्रुतिसीमन्तसिन्दूरीकृतपदाब्जधूळिकायै नमः
ॐ सकलागमसन्दोहशुक्तिसंपुटमौक्तिकायै नमः 290
ॐ पुरुषार्थप्रदायै नमः
ॐ पूर्णायै नमः
ॐ भोगिन्यै नमः
ॐ भुवनेश्वर्यै नमः
ॐ अंबिकायै नमः
ॐ अनादिनिधनायै नमः
ॐ हरिब्रह्मेन्द्रसेवितायै नमः
ॐ नारायण्यै नमः
ॐ नादरूपायै नमः
ॐ नामरूपविवर्जितायै नमः 300
ॐ ह्रींकार्यै नमः
ॐ ह्रीमत्यै नमः
ॐ हृद्यायै नमः
ॐ हेयोपादेयवर्जितायै नमः
ॐ राजराजार्चितायै नमः
ॐ राज्ञ्यै नमः
ॐ रम्यायै नमः
ॐ राजीवलोचनायै नमः
ॐ रंजन्यै नमः

ॐ रमण्यै नमः 310
ॐ रस्यायै नमः
ॐ रणत्किङ्किणिमेखलायै नमः
ॐ रमायै नमः
ॐ राकेन्दुवदनायै नमः
ॐ रतिरूपायै नमः
ॐ रतिप्रियायै नमः
ॐ रक्षाकर्यै नमः
ॐ राक्षसघ्न्यै नमः
ॐ रामायै नमः
ॐ रमणलंपटायै नमः 320
ॐ काम्यायै नमः
ॐ कामकलारूपायै नमः
ॐ कदंबकुसुमप्रियायै नमः
ॐ कल्याण्यै नमः
ॐ जगतीकंदायै नमः
ॐ करुणारससागरायै नमः
ॐ कळावत्यै नमः
ॐ कळालापायै नमः
ॐ कांतायै नमः
ॐ कादंबरीप्रियायै नमः 330
ॐ वरदायै नमः

ॐ वामनयनायै नमः
ॐ वारुणीमदविह्वलायै नमः
ॐ विश्वाधिकायै नमः
ॐ वेदवेद्यायै नमः
ॐ विन्ध्याचलनिवासिन्यै नमः
ॐ विधात्र्यै नमः
ॐ वेदजनन्यै नमः
ॐ विष्णुमायायै नमः
ॐ विलासिन्यै नमः 340
ॐ क्षेत्रस्वरूपायै नमः
ॐ क्षेत्रेश्यै नमः
ॐ क्षेत्रक्षेत्रज्ञपालिन्यै नमः
ॐ क्षयवृद्धिविनिर्मुक्तायै नमः
ॐ क्षेत्रपालसमर्चितायै नमः
ॐ विजयायै नमः
ॐ विमलायै नमः
ॐ वन्द्यायै नमः
ॐ वन्दारुजनवत्सलायै नमः
ॐ वाग्वादिन्यै नमः 350
ॐ वामकेश्यै नमः
ॐ वह्निमंडलवासिन्यै नमः
ॐ भक्तिमत्कल्पलतिकायै नमः

ॐ पशुपाशविमोचिन्यै नमः
ॐ संहृताशेषपाषण्डायै नमः
ॐ सदाचारप्रवर्तिकायै नमः
ॐ तापत्रयाग्निसन्तप्तसमाह्लादनचन्द्रिकायै नमः
ॐ तरुण्यै नमः
ॐ तापसाराध्यायै नमः
ॐ तनुमद्ध्यायै नमः 360
ॐ तमोपहायै नमः
ॐ चित्यै नमः
ॐ तत्पदलक्ष्यार्थायै नमः
ॐ चिदेकरसरूपिण्यै नमः
ॐ स्वात्मानन्दलवीभूतब्रह्माद्यानन्दसंतत्यै नमः
ॐ परायै नमः
ॐ प्रत्यक्चितीरूपायै नमः
ॐ पश्यंत्यै नमः
ॐ परदेवतायै नमः
ॐ मध्यमायै नमः 370
ॐ वैखरीरूपायै नमः
ॐ भक्तमानसहंसिकायै नमः
ॐ कामेश्वरप्राणनाड्यै नमः
ॐ कृतज्ञायै नमः
ॐ कामपूजितायै नमः

ॐ शृंगाररससंपूर्णायै नमः
ॐ जयायै नमः
ॐ जालन्धरस्थितायै नमः
ॐ ओढ्याणपीठनिलयायै नमः
ॐ बिन्दुमण्डलवासिन्यै नमः 380
ॐ राहोयागक्रमाराध्ययै नमः
ॐ रहस्तर्पणतर्पितायै नमः
ॐ सद्यःप्रसादिन्यै नमः
ॐ विश्वसाक्षिण्यै नमः
ॐ साक्षिवर्जितायै नमः
ॐ षडंगदेवतायुक्तायै नमः
ॐ षाड्गुण्यपरिपूरितायै नमः
ॐ नित्यक्लिन्नायै नमः
ॐ निरुपमायै नमः
ॐ निर्वाणसुखदायिन्यै नमः 390
ॐ नित्याषोडशिकारूपायै नमः
ॐ श्रीकंठार्धशरीरिण्यै नमः
ॐ प्रभावत्यै नमः
ॐ प्रभारूपायै नमः
ॐ प्रसिद्धायै नमः
ॐ परमेश्वर्यै नमः
ॐ मूलप्रकृत्यै नमः

ॐ अव्यक्तायै नमः
ॐ व्यक्ताव्यक्तस्वरूपिण्यै नमः
ॐ व्यापिन्यै नमः 400
ॐ विविधाकारायै नमः
ॐ विद्यायै नमः
ॐ अविद्यास्वरूपिण्यै नमः
ॐ महाकामेशनयनकुमुदाह्लादकौमुद्यै नमः
ॐ भक्तहार्दतमोभेदभानुमद्भानुसंतत्यै नमः
ॐ शिवदूत्यै नमः
ॐ शिवाराध्यायै नमः
ॐ शिवमूर्त्यै नमः
ॐ शिवंकर्यै नमः
ॐ शिवप्रियायै नमः 410
ॐ शिवपरायै नमः
ॐ शिष्टायै नमः
ॐ इश्टायै नमः
ॐ शिष्टपूजितायै नमः
ॐ अप्रमेयायै नमः
ॐ स्वप्रकाशायै नमः
ॐ मनोवाचामगोचरायै नमः
ॐ चिच्छक्त्यै नमः
ॐ चेतनारूपायै नमः

ॐ जडशक्त्यै नमः
ॐ जडात्मिकायै नमः
ॐ गायत्र्यै नमः 420
ॐ व्याहृत्यै नमः
ॐ सन्ध्यायै नमः
ॐ द्विजबृन्दनिषेवितायै नमः
ॐ तत्त्वासनायै नमः
ॐ तत्वमय्यै नमः
ॐ पंचकोशान्तरस्थितायै नमः
ॐ निस्सीममहिम्ने नमः
ॐ नित्ययौवनायै नमः 430
ॐ मदशालिन्यै नमः
ॐ मदघूर्णितरक्ताक्ष्यै नमः
ॐ मदपाटलगण्डभुवे नमः
ॐ चन्दनद्रवदिग्धांग्यै नमः
ॐ चांपेयकुसुमप्रियायै नमः
ॐ कुशलायै नमः
ॐ कोमलाकारायै नमः
ॐ कुरुकुळ्लायै नमः
ॐ कुलेश्वर्यै नमः
ॐ कुलकुण्डालयायै नमः 440
ॐ कौळमार्गतत्परसेवितायै नमः

ॐ कुमारगणनाथांबायै नमः
ॐ तुष्ट्यै नमः
ॐ पुष्ट्यै नमः
ॐ मत्यै नमः
ॐ धृत्यै नमः
ॐ शांत्यै नमः
ॐ स्वस्तिमत्यै नमः
ॐ कान्त्यै नमः
ॐ नंदिन्यै नमः 450
ॐ विघ्ननाशिन्यै नमः
ॐ तेजोवत्यै नमः
ॐ त्रिनयनायै नमः
ॐ लोलाक्ष्यै नमः
ॐ कामरूपिण्यै नमः
ॐ मालिन्यै नमः
ॐ हंसिन्यै नमः
ॐ मात्रे नमः
ॐ मलयाचलवासिन्यै नमः
ॐ सुमुखीयै नमः
ॐ नळिन्यै नमः 460
ॐ सुभ्रुवे नमः
ॐ शोभनायै नमः

ॐ सुरनायिकायै नमः
ॐ कालकण्ठ्यै नमः
ॐ कान्तिमत्यै नमः
ॐ क्षोभिण्यै नमः
ॐ सूक्ष्मरूपिण्यै नमः
ॐ वज्रेश्वर्यै नमः
ॐ वामदेव्यै नमः
ॐ वयोवस्थाविवर्जितायै नमः 470
ॐ सिद्धेश्वर्यै नमः
ॐ सिद्धविद्यायै नमः
ॐ सिद्धमात्रे नमः
ॐ यशस्विन्यै नमः
ॐ विशुद्धचक्रनिलयायै नमः
ॐ आरक्तवर्णायै नमः
ॐ त्रिलोचनायै नमः
ॐ खट्वांगादिप्रहरणायै नमः
ॐ वदनैकसमन्वितायै नमः
ॐ पायसान्नप्रियायै नमः 480
ॐ त्वक्स्थायै नमः
ॐ पशुलोकभयंकर्यै नमः
ॐ अमृतादिमहाशक्तिसंवृतायै नमः
ॐ डाकिनीश्वर्यै नमः

ॐ अनाहताब्जनिलयायै नमः
ॐ श्यामाभायै नमः
ॐ वदनद्वयायै नमः
ॐ दंष्ट्रोज्ज्वलायै नमः
ॐ अक्षमालादिधरायै नमः
ॐ रुधिरसंस्थितायै नमः 490
ॐ काळरात्र्यादिशक्त्यौघवृतायै नमः
ॐ स्निग्धौदनप्रियायै नमः
ॐ महावीरेंद्रवरदायै नमः
ॐ राकिण्यंबास्वरूपिण्यै नमः
ॐ मणिपूराब्जनिलयायै नमः
ॐ वदनत्रयसंयुतायै नमः
ॐ वज्रादिकायुधोपेतायै नमः
ॐ डामर्यादिभिरावृतायै नमः
ॐ रक्तवर्णायै नमः
ॐ मांसनिष्ठायै नमः 500
ॐ गुडान्नप्रीतमानसायै नमः
ॐ समस्तभक्तसुखदायै नमः
ॐ लाकिन्यंबास्वरूपिण्यै नमः
ॐ स्वाधिष्ठानांबुजगतायै नमः
ॐ चतुर्वक्त्रमनोहरायै नमः
ॐ शूलाद्यायुधसंपन्नायै नमः

ॐ पीतवर्णायै नमः
ॐ अतिगर्वितायै नमः
ॐ मेदोनिष्ठायै नमः
ॐ मधुप्रीतायै नमः 510
ॐ बन्दिन्यादिसमन्वितायै नमः
ॐ दद्ध्यन्नासक्तहृदयायै नमः
ॐ काकिनीरूपधारिण्यै नमः
ॐ मूलाधारांबुजारूढायै नमः
ॐ पंचवक्त्रायै नमः
ॐ अस्थिसंस्थितायै नमः
ॐ अंकुशादिप्रहरणायै नमः
ॐ वरदादिनिषेवितायै नमः
ॐ मुद्गौदनासक्तचित्तायै नमः
ॐ साकिन्यंबास्वरूपिण्यै नमः 520
ॐ आज्ञाचक्राब्ज निलयायै नमः
ॐ शुक्लवर्णायै नमः
ॐ षडाननायै नमः
ॐ मज्जासंस्थायै नमः
ॐ हंसवतीमुख्यशक्ति समन्वितायै नमः
ॐ हरिद्रान्नैकरसिकायै नमः
ॐ हाकिनीरूपधारिण्यै नमः
ॐ सहस्रदळपद्मस्थायै नमः

ॐ सर्ववर्णोपशोभितायै नमः
ॐ सर्वायुधधरायै नमः 530
ॐ शुक्लसंस्तितायै नमः
ॐ सर्वतोमुख्यै नमः
ॐ सर्वौदनप्रीतचित्तायै नमः
ॐ याकिन्यंबास्वरूपिण्यै नमः
ॐ स्वाहायै नमः
ॐ स्वधायै नमः
ॐ मत्यै नमः
ॐ मेधायै नमः
ॐ श्रुत्यै नमः
ॐ स्मृत्यै नमः 540
ॐ अनुत्तमायै नमः
ॐ पुण्यकीर्तये नमः
ॐ पुण्यलभ्यायै नमः
ॐ पुण्यश्रवणकीर्तनायै नमः
ॐ पुलोमजार्चितायै नमः
ॐ बन्धमोचिन्यै नमः
ॐ बन्धुरालकायै नमः
ॐ विमर्शरूपिण्यै नमः
ॐ विद्यायै नमः
ॐ वियदादिजगत्प्रसवे नमः 550

ॐ सर्वव्याधि प्रशमन्यै नमः
ॐ सर्वमृत्यु निवारिण्यै नमः
ॐ अग्रगण्यायै नमः
ॐ अचिंत्यरूपायै नमः
ॐ कलिकल्मषनाशिन्यै नमः
ॐ कात्यायन्यै नमः
ॐ कालहन्त्र्यै नमः
ॐ कमलाक्षनिषॆवितायै नमः
ॐ तांबूलपूरितमुखीयै नमः
ॐ दाडिमीकुसुमप्रभायै नमः 560
ॐ मृगाक्ष्यै नमः
ॐ मॊहिन्यै नमः
ॐ मुख्यायै नमः
ॐ मृडान्यै नमः
ॐ मित्ररूपिण्यै नमः
ॐ नित्यतृप्तायै नमः
ॐ भक्तनिधयॆ नमः
ॐ नियन्त्र्यै नमः
ॐ निखिलॆश्वर्यै नमः
ॐ मैत्र्यादिवासनालभ्यायै नमः 570
ॐ महाप्रळयसाक्षिण्यै नमः
ॐ पराशक्त्यै नमः

ॐ परानिष्ठायै नमः
ॐ प्राज्ञानघनरूपिण्यै नमः
ॐ माद्ध्वीपानालसायै नमः
ॐ मत्तायै नमः
ॐ मातृकावर्णरूपिण्यै नमः
ॐ महाकैलासनिलयायै नमः
ॐ मृणाळमृदुदोर्लतायै नमः
ॐ महनीयायै नमः 580
ॐ दयामूर्त्यै नमः
ॐ महासाम्राज्यशालिन्यै नमः
ॐ आत्मविद्यायै नमः
ॐ महाविद्यायै नमः
ॐ श्रीविद्यायै नमः
ॐ कामसेवितायै नमः
ॐ श्रीषोडशाक्षरीविद्यायै नमः
ॐ त्रिकूटायै नमः
ॐ कामकोटिकायै नमः
ॐ कटाक्षकिङ्करीभूतकमलाकोटिसेवितायै नमः 590
ॐ शिरस्थितायै नमः
ॐ चन्द्रनिभायै नमः
ॐ फालस्थायै नमः
ॐ इन्द्रधनुप्रभायै नमः

ॐ हृदयस्थायै नमः
ॐ रविप्रख्यायै नमः
ॐ त्रिकोणांतरदीपिकायै नमः
ॐ दाक्षायण्यै नमः
ॐ दैत्यहन्त्र्यै नमः
ॐ दक्षयज्ञविनाशिन्यै नमः 600
ॐ दरांतोळितदीर्घाक्ष्यै नमः
ॐ दरहासोज्ज्वलन्मुखीयै नमः
ॐ गुरुमूर्त्यै नमः
ॐ गुणनिधये नमः
ॐ गोमात्रे नमः
ॐ गुहजन्मभुवे नमः
ॐ देवेश्यै नमः
ॐ दण्डनीतिस्थायै नमः
ॐ दहराकाश रूपिण्यै नमः
ॐ प्रतिपन्मुख्यराकान्ततिथिमण्डलपूजितायै नमः 610
ॐ कळात्मिकायै नमः
ॐ कळानाथायै नमः
ॐ काव्यालापविनोदिन्यै नमः
ॐ सचामररमावाणीसव्यदक्षिणसेवितायै नमः
ॐ आदिशक्त्यै नमः
ॐ अमेयायै नमः

ॐ आत्मने नमः
ॐ परमायै नमः
ॐ पावनाकृत्यै नमः
ॐ अनेककोटिब्रह्माण्डजनन्यै नमः
ॐ दिव्यविग्रहायै नमः
ॐ क्लींकार्यै नमः
ॐ केवलायै नमः
ॐ गुह्यायै नमः
ॐ कैवल्यपददायिन्यै नमः
ॐ त्रिपुरायै नमः
ॐ त्रिजगद्वंद्यायै नमः
ॐ त्रिमूर्त्यै नमः
ॐ त्रिदशेश्वर्यै नमः
ॐ त्र्यक्षर्यै नमः 630
ॐ दिव्यगंधाढ्यायै नमः
ॐ सिन्दूरतिलकांचितायै नमः
ॐ उमायै नमः
ॐ शैलेन्द्र तनयायै नमः
ॐ गौर्यै नमः
ॐ गन्धर्वसेवितायै नमः
ॐ विश्वगर्भायै नमः
ॐ स्वर्णगर्भायै नमः

ॐ वरदायै नमः
ॐ वागधीश्वर्यै नमः 640
ॐ ध्यानगम्यायै नमः
ॐ अपरिच्छेद्यायै नमः
ॐ ज्ञानदायै नमः
ॐ ज्ञानविग्रहायै नमः
ॐ सर्ववेदान्त संवेद्यायै नमः
ॐ सत्यानन्दस्वरूपिण्यै नमः
ॐ लोपामुद्रार्चितायै नमः
ॐ लीलाक्लुप्तब्रह्माण्डमण्डलायै नमः
ॐ अदृश्यायै नमः
ॐ दृश्यरहितायै नमः 650
ॐ विज्ञात्र्यै नमः
ॐ वेद्यवर्जितायै नमः
ॐ योगिन्यै नमः
ॐ योगदायै नमः
ॐ योग्यायै नमः
ॐ योगानंदायै नमः
ॐ युगन्धरायै नमः
ॐ इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिस्वरूपिण्यै नमः
ॐ सर्वाधारायै नमः
ॐ सुप्रतिष्ठायै नमः 660

ॐ सदसद्रूपधारिण्यै नमः
ॐ अष्टमूर्त्त्यै नमः
ॐ अजाजैत्र्यै नमः
ॐ लोकयात्राविधायिन्यै नमः
ॐ ऐकाकिन्यै नमः
ॐ भूमरूपायै नमः
ॐ निर्द्वैतायै  नमः
ॐ द्वैतवर्जितायै नमः
ॐ अन्नदायै नमः
ॐ वसुदायै नमः  670
ॐ वृद्धायै नमः
ॐ ब्रह्मात्मैक्यस्वरूपिण्यै नमः
ॐ बृहत्यै नमः
ॐ ब्राह्मण्यै नमः
ॐ ब्राह्म्यै  नमः
ॐ ब्रह्मानंदायै नमः
ॐ बलिप्रियायै नमः
ॐ भाषारूपायै नमः
ॐ बृहत्सेनायै नमः
ॐ भावाभावविवर्जितायै नमः 680
ॐ सुखाराद्ध्यायै नमः
ॐ शुभकर्यै नमः

ॐ शोभनासुलभागत्यै नमः
ॐ राजराजेश्वर्यै नमः
ॐ राज्यदायिन्यै नमः
ॐ राज्यवल्लभायै नमः
ॐ राजत्कृपायै नमः
ॐ राजपीठनिवेशितनिजाश्रितायै नमः
ॐ राज्यलक्ष्म्यै नमः
ॐ कोशनाथायै नमः 690
ॐ चतुरंगबलेश्वर्यै नमः
ॐ साम्राज्यदायिन्यै नमः
ॐ सत्यसंधायै नमः
ॐ सागरमेखलायै नमः
ॐ दीक्षितायै नमः
ॐ दैत्यशमन्यै नमः
ॐ सर्वलोकवशंकर्यै नमः
ॐ सर्वार्त्थदात्र्यै नमः
ॐ सावित्र्यै नमः
ॐ सच्चिदानंदरूपिण्यै नमः 700
ॐ देशकालापरिच्छिन्नायै नमः
ॐ सर्वगायै नमः
ॐ सर्वमोहिन्यै नमः
ॐ सरस्वत्यै नमः

ॐ शास्त्रमय्यै नमः
ॐ गुहांबायै नमः
ॐ गुह्यरूपिण्यै नमः
ॐ सर्वोपाधिविनिर्मुक्तायै नमः
ॐ सदाशिवपतिव्रतायै नमः
ॐ संप्रदायेश्वर्यै नमः 710
ॐ साध्व्यै नमः
ॐ गुरुमण्डलरूपिण्यै नमः
ॐ कुलोत्तीर्णायै नमः
ॐ भगाराध्यायै नमः
ॐ मायायै नमः
ॐ मधुमत्यै नमः
ॐ मह्यै नमः
ॐ गणांबायै नमः
ॐ गुह्यकाराध्यायै नमः 720
ॐ कोमलांग्यै नमः
ॐ गुरुप्रियायै नमः
ॐ स्वतंत्रायै नमः
ॐ सर्वतन्त्रेश्यै नमः
ॐ दक्षिणामूर्तिरूपिण्यै नमः
ॐ सनकादिसमाराध्यायै नमः
ॐ शिवज्ञानप्रदायिन्यै नमः

ॐ चित्कळायै नमः
ॐ आनंदकलिकायै नमः
ॐ प्रेमरूपायै नमः 730
ॐ प्रियंकर्यै नमः
ॐ नामपारायणप्रीतायै नमः
ॐ नंदिविद्यायै नमः
ॐ नटेश्वर्यै नमः
ॐ मिथ्याजगदधिष्ठानायै नमः
ॐ मुक्तिदायै नमः
ॐ मुक्तिरूपिण्यै नमः
ॐ लास्यप्रियायै नमः
ॐ लयकर्यै नमः
ॐ लज्जायै नमः 740
ॐ रंभादिवन्दितायै नमः
ॐ भवदावसुधावृष्ट्यै नमः
ॐ पापारण्यदवानलायै नमः
ॐ दौर्भाग्यतूलवातूलायै नमः
ॐ जराध्वांतरविप्रभायै नमः
ॐ भाग्याब्धिचंद्रिकायै नमः
ॐ भक्तचित्तकेकिघनाघनायै नमः
ॐ रोगपर्वतदंभोळये नमः
ॐ मृत्युदारुकुठारिकायै नमः

ॐ महेश्वर्यै नमः 750

ॐ महाकाळ्यै नमः

ॐ महाग्रासायै नमः

ॐ महाशनायै नमः

ॐ अपर्णायै नमः

ॐ चंडिकायै नमः

ॐ चंडमुंडासुरनिषूदिन्यै नमः

ॐ क्षराक्षरात्मिकायै नमः

ॐ सर्वलोकेश्यै नमः

ॐ विश्वधारिण्यै नमः

ॐ त्रिवर्गदात्र्यै नमः 760

ॐ सुभगायै नमः

ॐ त्र्यंबकायै नमः

ॐ त्रिगुणात्मिकायै नमः

ॐ स्वर्गापवर्गदायै नमः

ॐ शुद्धायै नमः

ॐ जपापुष्पनिभाकृत्यै नमः

ॐ ओजोवत्यै नमः

ॐ द्युतिधरायै नमः

ॐ यज्ञरूपायै नमः

ॐ प्रियव्रतायै नमः 770

ॐ दुराराध्यायै नमः

ॐ दुराधर्षायै नमः

ॐ पाटलीकुसुमप्रियायै नमः

ॐ महत्यै नमः

ॐ मेरुनिलयायै नमः

ॐ मंदारकुसुमप्रियायै नमः

ॐ वीराराध्यायै नमः

ॐ विराड्रूपायै नमः

ॐ विरजायै नमः

ॐ विश्वतोमुखीयै नमः 780

ॐ प्रत्यग्रूपायै नमः

ॐ पराकाशायै नमः

ॐ प्राणदायै नमः

ॐ प्राणरूपिण्यै नमः

ॐ मार्ताण्डभैरवाराध्यायै नमः

ॐ मन्त्रिणीन्यस्तराज्यधुरे नमः

ॐ त्रिपुरेश्यै नमः

ॐ जयत्सेनायै नमः

ॐ निस्त्रैगुण्यायै नमः

ॐ परापरायै नमः 790

ॐ सत्यज्ञानानन्दरूपायै नमः

ॐ सामरस्यपरायणायै नमः

ॐ कपर्दिन्यै नमः

ॐ कलामालायै नमः
ॐ कामदुघे नमः
ॐ कामरूपिण्यै नमः
ॐ कळानिधये नमः
ॐ काव्यकळायै नमः
ॐ रसज्ञायै नमः
ॐ रसशेवधये नमः 800
ॐ पुष्टायै नमः
ॐ पुरातनायै नमः
ॐ पूज्यायै नमः
ॐ पुष्करायै नमः
ॐ पुष्करेक्षणायै नमः
ॐ परंज्योतिषे नमः
ॐ परंधाम्ने नमः
ॐ परमाणवे नमः
ॐ परात्परायै नमः
ॐ पाशहस्तायै नमः 810
ॐ पाशहंत्र्यै नमः
ॐ परमंत्रविभेदिन्यै नमः
ॐ मूर्तायै नमः
ॐ अमूर्तायै नमः
ॐ नित्यतृप्तायै नमः

ॐ मुनिमानसहंसिकायै नमः
ॐ सत्यव्रतायै नमः
ॐ सत्यरूपायै नमः
ॐ सर्वान्तर्यामिन्यै नमः
ॐ सत्यै नमः 820
ॐ ब्रह्माण्यै नमः
ॐ ब्रह्मणे नमः
ॐ जनन्यै नमः
ॐ बहुरूपायै नमः
ॐ बुधार्चितायै नमः
ॐ प्रसवित्र्यै नमः
ॐ प्रचंडायै नमः
ॐ आज्ञायै नमः
ॐ प्रतिष्ठायै नमः
ॐ प्रकटाकृत्यै नमः 830
ॐ प्राणेश्वर्यै नमः
ॐ प्राणदात्र्यै नमः
ॐ पंचाशत्पीठरूपिण्यै नमः
ॐ विशृंखलायै नमः
ॐ विविक्तस्थायै नमः
ॐ वीरमात्रे नमः
ॐ वियत्प्रसवे नमः

ॐ मुकुंदायै नमः
ॐ मुक्तिनिलयायै नमः
ॐ मूलविग्रहरूपिण्यै नमः 840
ॐ भावज्ञायै नमः
ॐ भवरोगघ्न्यै नमः
ॐ भवचक्रप्रवर्तिन्यै नमः
ॐ चंदस्सारायै नमः
ॐ शास्त्रसारायै नमः
ॐ मंत्रसारायै नमः
ॐ तलोदर्यै नमः
ॐ उदारकीर्त्यै नमः
ॐ उद्दामवैभवायै नमः
ॐ वर्णरूपिण्यै नमः 850
ॐ जन्ममृत्युजरातप्तजनविश्रान्तिदायिन्यै नमः
ॐ सर्वोपनिषदुद्धुष्टायै नमः
ॐ शान्त्यतीतकलात्मिकायै नमः
ॐ गंभीरायै नमः
ॐ गगनांतःस्थायै नमः
ॐ गर्वितायै नमः
ॐ गानलोलुपायै नमः
ॐ कल्पनारहितायै नमः
ॐ काष्ठायै नमः

ॐ कान्तायै नमः 860
ॐ कान्तार्धविग्रहायै नमः
ॐ कार्यकारणविनिर्मुक्तायै नमः
ॐ कामकेळितरंगितायै नमः
ॐ कनत्कनकताटंकायै नमः
ॐ लीलाविग्रहधारिण्यै नमः
ॐ अजायै नमः
ॐ क्षयविनिर्मुक्तायै नमः
ॐ मुग्धायै नमः
ॐ क्षिप्रप्रसादिन्यै नमः
ॐ अन्तर्मुखसमाराध्यायै नमः 870
ॐ बहिर्मुखसुदुर्लभायै नमः
ॐ त्रय्यै नमः
ॐ त्रिवर्गनिलयायै नमः
ॐ त्रिस्थायै नमः
ॐ त्रिपुरमालिन्यै नमः
ॐ निरामयायै नमः
ॐ निरालंबायै नमः
ॐ स्वात्मारामायै नमः
ॐ सुधासृत्यै नमः
ॐ संसारपंकनिर्मग्नसमुद्धरणपण्डितायै नमः 880
ॐ यज्ञप्रियायै नमः

ॐ यज्ञकर्त्र्यै नमः
ॐ यजमानस्वरूपिण्यै नमः
ॐ धर्माधारायै नमः
ॐ धनाध्यक्षायै नमः
ॐ धनधान्यविवर्धिन्यै नमः
ॐ विप्रप्रियायै नमः
ॐ विप्ररूपायै नमः
ॐ विश्वभ्रमणकारिण्यै नमः
ॐ विश्वग्रासायै नमः 890
ॐ विद्रुमाभायै नमः
ॐ वैष्णव्यै नमः
ॐ विष्णुरूपिण्यै नमः
ॐ अयोन्यै नमः
ॐ योनिनिलयायै नमः
ॐ कूटस्थायै नमः
ॐ कुलरूपिण्यै नमः
ॐ वीरगोष्ठिप्रियायै नमः
ॐ वीरायै नमः
ॐ नैष्कर्म्यायै नमः 900
ॐ नादरूपिण्यै नमः
ॐ विज्ञानकलनायै नमः
ॐ कल्यायै नमः

ॐ विदग्धायै नमः

ॐ बैंदवासनायै नमः

ॐ तत्त्वाधिकायै नमः

ॐ तत्त्वमय्यै नमः

ॐ तत्त्वमर्थस्वरूपिण्यै नमः

ॐ सामगानप्रियायै नमः

ॐ स्ॐयायै नमः 910

ॐ सदाशिवकुटुंबिन्यै नमः

ॐ सव्यापसव्यमार्गस्थायै नमः

ॐ सर्वापद्विनिवारिण्यै नमः

ॐ स्वस्थायै नमः

ॐ स्वभावमधुरायै नमः

ॐ धीरायै नमः

ॐ धीरसमर्चितायै नमः

ॐ चैतन्यार्घ्यसमाराध्यायै नमः

ॐ चैतन्यकुसुमप्रियायै नमः

ॐ सदोदितायै नमः 920

ॐ सदातुष्टायै नमः

ॐ तरुणादित्यपाटलायै नमः

ॐ दक्षिणादक्षिणाराध्यायै नमः

ॐ दरस्मेरमुखांबुजायै नमः

ॐ कौळिनीकेवलायै नमः

ॐ अनर्घ्यकैवल्यपददायिन्यै नमः
ॐ स्तोत्रप्रियायै नमः
ॐ स्तुतिमत्यै नमः
ॐ श्रुतिसंस्तुतवैभवायै नमः
ॐ मनस्विन्यै नमः 930
ॐ मानवत्यै नमः
ॐ महेश्यै नमः
ॐ मंगळाकृत्यै नमः
ॐ विश्वमात्रे नमः
ॐ जगद्धात्र्यै नमः
ॐ विशालाक्ष्यै नमः
ॐ विरागिण्यै नमः
ॐ प्रगल्भायै नमः
ॐ परमोदारायै नमः
ॐ परामोदायै नमः 940
ॐ मनोमय्यै नमः
ॐ व्योमकेश्यै नमः
ॐ विमानस्थायै नमः
ॐ वज्रिण्यै नमः
ॐ वामकेश्वर्यै नमः
ॐ पंचयज्ञप्रियायै नमः
ॐ पंचप्रेतमंचाधिशायिन्यै नमः

ॐ पंचम्यै नमः
ॐ पंचभूतेश्यै नमः
ॐ पंचसंख्योपचारिण्यै नमः 950
ॐ शाश्वत्यै नमः
ॐ शाश्वतैश्वर्यायै नमः
ॐ शर्मदायै नमः
ॐ शंभुमोहिन्यै नमः
ॐ धरायै नमः
ॐ धरसुतायै नमः
ॐ धन्यायै नमः
ॐ धर्मिण्यै नमः
ॐ धर्मवर्धिन्यै नमः
ॐ लोकातीतायै नमः 960
ॐ गुणातीतायै नमः
ॐ सर्वातीतायै नमः
ॐ शमात्मिकायै नमः
ॐ बंधूककुसुमप्रख्यायै नमः
ॐ बालायै नमः
ॐ लीलाविनोदिन्यै नमः
ॐ सुमंगळ्यै नमः
ॐ सुखकर्यै नमः
ॐ सुवेषाढ्यायै नमः

ॐ सुवासिन्यै नमः 970

ॐ सुवासिन्यर्चनप्रीतायै नमः

ॐ शोभनायै नमः

ॐ शुद्धमानसायै नमः

ॐ बिन्दुतर्पणसंतुष्टायै नमः

ॐ पूर्वजायै नमः

ॐ त्रिपुरांबिकायै नमः

ॐ दशमुद्रासमाराध्यायै नमः

ॐ त्रिपुराश्रीवशंकर्यै नमः

ॐ ज्ञानमुद्रायै नमः

ॐ ज्ञानगम्यायै नमः 980

ॐ ज्ञानज्ञेयस्वरूपिण्यै नमः

ॐ योनिमुद्रायै नमः

ॐ त्रिखण्डेश्यै नमः

ॐ त्रिगुणायै नमः

ॐ अंबायै नमः

ॐ त्रिकोणगायै नमः

ॐ अनघायै नमः

ॐ अद्भुतचारित्रायै नमः

ॐ वांछितार्थप्रदायिन्यै नमः

ॐ अभ्यासातिशयज्ञातायै नमः 990

ॐ षडद्ध्वातीतरूपिण्यै नमः

ॐ अव्याजकरुणामूर्तये नमः
ॐ अज्ञानध्वान्तदीपिकायै नमः
ॐ आबालगोपविदितायै नमः
ॐ सर्वानुल्लंघ्यशासनायै नमः
ॐ श्रीचक्रराजनिलयायै नमः
ॐ श्रीमत्त्रिपुरसुन्दर्यै नमः
ॐ श्रीशिवायै नमः
ॐ शिवशक्त्यैक्यरूपिण्यै नमः

ॐ ऐं ह्रीं श्रीं
ॐ श्रीललितंबिकायै नमः

इति श्री ललिता सहस्र नामावळी समाप्तः

# श्री दुर्गाष्टोत्तरशतनामावळिः

ॐ सत्यै नमः । ॐ साध्व्यै नमः । ॐ भवप्रीतायै नमः । ॐ भवान्यै नमः । ॐ भवमोचन्यै नमः । ॐ आर्यायै नमः । ॐ दुर्गायै नमः । ॐ जयायै नमः । ॐ आद्यायै नमः । ॐ त्रिनेत्रायै नमः । १० ॥ ॐ शूलधारिण्यै नमः । ॐ पिनाकधारिण्यै नमः । ॐ चित्रायै नमः । ॐ चंद्रघंटायै नमः । ॐ महातपायै नमः । ॐ मनसे नमः । ॐ बुद्ध्यै नमः । ॐ अहंकारायै नमः । ॐ चित्तरूपायै नमः । ॐ चितायै नमः । २० ॥ ॐ चित्यै नमः । ॐ सर्वमंत्रमय्यै नमः । ॐ सत्तायै नमः । ॐ सत्यानंदस्वरूपिण्यै नमः । ॐ अनंतायै नमः । ॐ भाविन्यै नमः । ॐ भाव्यायै नमः । ॐ भव्यायै नमः । ॐ अभव्यायै नमः । ॐ सदागत्यै नमः । ३० ॥ ॐ शांभव्यै नमः । ॐ देवमात्रे नमः । ॐ चिंतायै नमः । ॐ रत्नप्रियायै नमः । ॐ सर्वविद्यायै नमः । ॐ दक्षकन्यायै नमः । ॐ दक्षयज्ञविनाशिन्यै नमः । ॐ अपर्णायै नमः । ॐ अनेकवर्णायै नमः । ॐ पाटलायै नमः । ४० ॥ ॐ पाटलावत्यै नमः । ॐ पट्ट ांबरपरीधानायै नमः । ॐ कलमंजीररंजिन्यै नमः । ॐ अमेयविक्रमायै नमः । ॐ क्रूरायै नमः । ॐ सुंदर्यै नमः । ॐ सुरसुंदर्यै नमः । ॐ वनदुर्गायै नमः । ॐ मातंग्यै नमः । ॐ मतंगमुनिपूजितायै नमः । ५० ॥ ॐ ब्राह्म्यै नमः । ॐ माहेश्वर्यै नमः । ॐ ऐंद्र्यै नमः । ॐ कौमार्यै नमः । ॐ वैष्णव्यै नमः । ॐ चामुंडायै नमः । ॐ वाराह्यै नमः । ॐ लक्ष्म्यै नमः । ॐ पुरुषाकृत्यै नमः । ॐ विमलायै नमः । ६० ॥ ॐ उत्कर्षिण्यै नमः ।

ॐ ज्ञानायै नमः । ॐ क्रियायै नमः । ॐ नित्यायै नमः । ॐ बुद्धिदायै नमः । ॐ बहुळायै नमः । ॐ बहुळप्रेमायै नमः । ॐ सर्ववाहनवाहन्यै नमः । ॐ निशुंभशुंभहनन्यै नमः । ॐ महिषासुरमर्दिन्यै नमः । ७० ॥ ॐ मधुकैटभहंत्र्यै नमः । ॐ चंडमुंडविनाशिन्यै नमः । ॐ सर्वासुरविनाशायै नमः । ॐ सर्वदानवघातिन्यै नमः । ॐ सर्वशास्त्रमय्यै नमः । ॐ सत्यायै नमः । ॐ सर्वस्त्रधारिण्यै नमः । ॐ अनेकशस्त्रहस्तायै नमः । ॐ अनेकास्त्रधारिण्यै नमः । ॐ कुमार्यै नमः । ८० ॥ ॐ ऐककन्यायै नमः । ॐ कैशोर्यै नमः । ॐ युवत्यै नमः । ॐ यत्यै नमः । ॐ अप्रौढायै नमः । ॐ प्रौढायै नमः । ॐ वृद्धमात्रे नमः । ॐ बलप्रदायै नमः । ॐ महोदर्यै नमः । ॐ मुक्तकेश्यै नमः । ९० ॥ ॐ घोररूपायै नमः । ॐ महाबलायै नमः । ॐ अग्निज्वालायै नमः । ॐ रौद्रमुख्यै नमः । ॐ कालरात्र्यै नमः । ॐ तपस्विन्यै नमः । ॐ नारायण्यै नमः । ॐ भद्रकाळ्यै नमः । ॐ विष्णुमायायै नमः । ॐ जलोदर्यै नमः । १०० ॥ ॐ शिवदूत्यै नमः । ॐ कराल्यै नमः । ॐ अनंतायै नमः । ॐ परमेश्वर्यै नमः । ॐ कात्यायन्यै नमः । ॐ सावित्र्यै नमः । ॐ प्रत्यक्षायै नमः । ॐ ब्रह्मवादिन्यै नमः । १०८ ॥ ॥ इति श्री दुर्गाष्टोत्तरशतनामावलिः ॥

## श्री लक्ष्मी अष्टोत्तरशतनामावळिः ।

ॐ प्रकृत्यै नमः । ॐ विकृत्यै नमः । ॐ विद्यायै नमः । ॐ सर्वभूतहितप्रदायै नमः । ॐ श्रद्धायै नमः । ॐ विभूत्यै नमः । ॐ सुरभ्यै नमः । ॐ परमात्मिकायै नमः । ॐ वाचे नमः । ॐ पद्मालयायै नमः । १० ॥ ॐ पद्मायै नमः । ॐ शुचये नमः । ॐ स्वाहायै नमः । ॐ स्वधायै नमः । ॐ सुधायै नमः । ॐ धन्यायै नमः । ॐ हिरण्मय्यै नमः । ॐ लक्ष्म्यै नमः । ॐ नित्यपुष्टायै नमः । ॐ विभावर्यै नमः । २० ॥ ॐ अदित्यै नमः । ॐ दित्यै नमः । ॐ दीप्तायै नमः । ॐ वसुधायै नमः । ॐ वसुधारिण्यै नमः । ॐ कमलायै नमः । ॐ कांतायै नमः । ॐ कामाक्ष्यै नमः । ॐ क्रोधसंभवायै नमः । ॐ अनुग्रहप्रदायै नमः । ३० ॥ ॐ बुद्धये नमः । ॐ अनघायै नमः । ॐ हरिवल्लभायै नमः । ॐ अशोकायै नमः । ॐ अमृतायै नमः । ॐ दीप्तायै नमः । ॐ लोकशोकविनाशिन्यै नमः । ॐ धर्मनिलयायै नमः । ॐ करुणायै नमः । ॐ लोकमात्रे नमः । ४० ॥ ॐ पद्मप्रियायै नमः । ॐ पद्महस्तायै नमः । ॐ पद्माक्ष्यै नमः । ॐ पद्मसुंदर्यै नमः । ॐ पद्मोद्भवायै नमः । ॐ पद्ममुख्यै नमः । ॐ पद्मनाभप्रियायै नमः । ॐ रमायै नमः । ॐ पद्ममालाधरायै नमः । ॐ देव्यै नमः । ५० ॥ ॐ पद्मिन्यै नमः । ॐ पद्मगंधिन्यै नमः । ॐ पुण्यगंधायै नमः । ॐ सुप्रसन्नायै नमः । ॐ प्रसादाभिमुख्यै नमः । ॐ प्रभायै नमः । ॐ चंद्रवदनायै नमः । ॐ चंद्रायै नमः । ॐ चंद्रसहोदर्यै नमः ।

ॐ चतुर्भुजायै नमः । ६० ॥ ॐ चंद्ररूपायै नमः । ॐ इंदिरायै नमः । ॐ इंदुशीतलायै नमः । ॐ आह्लादजनन्यै नमः । ॐ पुष्ट्यै नमः । ॐ शिवायै नमः । ॐ शिवकर्यै नमः । ॐ सत्यै नमः । ॐ विमलायै नमः । ॐ विश्वजनन्यै नमः । ७० ॥ ॐ तुष्ट्यै नमः । ॐ दारिद्र्यनाशिन्यै नमः । ॐ प्रीतिपुष्करिण्यै नमः । ॐ शांतायै नमः । ॐ शुक्लमाल्यांबरायै नमः । ॐ श्रियै नमः । ॐ भास्कर्यै नमः । ॐ बिल्वनिलयायै नमः । ॐ वरारोहायै नमः । ॐ यशस्विन्यै नमः । ८० ॥ ॐ वसुंधरायै नमः । ॐ उदारांगायै नमः । ॐ हरिण्यै नमः । ॐ हेममालिन्यै नमः । ॐ धनधान्यकर्यै नमः । ॐ सिद्धये नमः । ॐ स्त्रैणसौम्यायै नमः । ॐ शुभप्रदाये नमः । ॐ नृपवेश्मगतानंदायै नमः । ॐ वरलक्ष्म्यै नमः । ९० ॥ ॐ वसुप्रदायै नमः । ॐ शुभायै नमः । ॐ हिरण्यप्राकारायै नमः । ॐ समुद्रतनयायै नमः । ॐ जयायै नमः । ॐ मंगळा देव्यै नमः । ॐ विष्णुवक्षस्स्थलस्थितायै नमः । ॐ विष्णुपत्न्यै नमः । ॐ प्रसन्नाक्ष्यै नमः । ॐ नारायणसमाश्रितायै नमः । १०० ॥ ॐ दारिद्र्यध्वंसिन्यै नमः । ॐ देव्यै नमः । ॐ सर्वोपद्रववारिण्यै नमः । ॐ नवदुर्गायै नमः । ॐ महाकाल्यै नमः । ॐ ब्रह्माविष्णुशिवात्मिकायै नमः । ॐ त्रिकालज्ञानसंपन्नायै नमः । ॐ भुवनेश्वर्यै नमः । १०८ ॥

# श्री सरस्वती अष्टोत्तरशतनामावळिः ।

ॐ सरस्वत्यै नमः । ॐ महाभद्रायै नमः । ॐ महामायायै नमः । ॐ वरप्रदायै नमः । ॐ श्रीप्रदायै नमः । ॐ पद्मनिलयायै नमः । ॐ पद्माक्ष्यै नमः । ॐ पद्मवक्त्रायै नमः । ॐ शिवानुजायै नमः । ॐ पुस्तकभृते नमः । १० ॐ ज्ञानमुद्रायै नमः । ॐ रमायै नमः । ॐ परायै नमः । ॐ कामरूपायै नमः । ॐ महाविद्यायै नमः । ॐ महापातकनाशिन्यै नमः । ॐ महाश्रयायै नमः । ॐ मालिन्यै नमः । ॐ महाभोगायै नमः । ॐ महाभुजायै नमः । २० ॐ महाभागायै नमः । ॐ महोत्साहायै नमः । ॐ दिव्यांगायै नमः । ॐ सुरवंदितायै नमः । ॐ महाकाळ्यै नमः । ॐ महापाशायै नमः । ॐ महाकारायै नमः । ॐ महांकुशायै नमः । ॐ पीतायै नमः । ॐ विमलायै नमः । ३० ॐ विश्वायै नमः । ॐ विद्युन्मालायै नमः । ॐ वैष्णव्यै नमः । ॐ चंद्रिकायै नमः । ॐ चंद्रवदनायै नमः । ॐ चंद्रलेखाविभूषितायै नमः । ॐ सावित्र्यै नमः । ॐ सुरसायै नमः । ॐ देव्यै नमः । ॐ दिव्यालंकारभूषितायै नमः । ४० ॐ वाग्देव्यै नमः । ॐ वसुधायै नमः । ॐ तीव्रायै नमः । ॐ महाभद्रायै नमः । ॐ महाबलायै नमः । ॐ भोगदायै नमः । ॐ भारत्यै नमः । ॐ भामायै नमः । ॐ गोविंदायै नमः । ॐ गोमत्यै नमः । ५० ॐ शिवायै नमः । ॐ जटिलायै नमः । ॐ विंध्यवासायै नमः । ॐ विंध्याचलविराजितायै नमः । ॐ चंडिकायै नमः । ॐ वैष्णव्यै नमः । ॐ ब्राह्म्यै नमः । ॐ

ब्रह्मज्ञानैकसाधनायै नमः । ॐ सौदामिन्यै नमः । ॐ सुधामूर्त्यै नमः । ६० ॐ सुभद्रायै नमः । ॐ सुरपूजितायै नमः । ॐ सुवासिन्यै नमः । ॐ सुनासायै नमः । ॐ विनिद्रायै नमः । ॐ पद्मलोचनायै नमः । ॐ विद्यारूपायै नमः । ॐ विशालाक्ष्यै नमः । ॐ ब्रह्मजायायै नमः । ॐ महाफलायै नमः । ७० ॐ त्रयीमूर्त्यै नमः । ॐ त्रिकालज्ञायै नमः । ॐ त्रिगुणायै नमः । ॐ शास्त्ररूपिण्यै नमः । ॐ शुंभासुरप्रमथिन्यै नमः । ॐ शुभदायै नमः । ॐ स्वरात्मिकायै नमः । ॐ रक्तबीजनिहंत्र्यै नमः । ॐ चामुंडायै नमः । ॐ अंबिकायै नमः । ८० ॐ मुंडकायप्रहरणायै नमः । ॐ धूम्रलोचनमर्दनायै नमः । ॐ सर्वदेवस्तुतायै नमः । ॐ सौम्यायै नमः । ॐ सुरासुरनमस्कृतायै नमः । ॐ काळरात्र्यै नमः । ॐ कळाधारायै नमः । ॐ रूपसौभाग्यदायिन्यै नमः । ॐ वाग्देव्यै नमः । ॐ वरारोहायै नमः । ९० ॐ वाराह्यै नमः । ॐ वारिजासनायै नमः । ॐ चित्रांबरायै नमः । ॐ चित्रगंधायै नमः । ॐ चित्रमाल्यविभूषितायै नमः । ॐ कांतायै नमः । ॐ कामप्रदायै नमः । ॐ वंद्यायै नमः । ॐ विद्याधरसुपूजितायै नमः । ॐ श्वेताननायै नमः । १०० ॐ नीलभुजायै नमः । ॐ चतुर्वर्गफलप्रदायै नमः । ॐ चतुराननसाम्राज्यायै नमः । ॐ रक्तमध्यायै नमः । ॐ निरंजनायै नमः । ॐ हंसासनायै नमः । ॐ नीलजंघायै नमः । ॐ ब्रह्मविष्णुशिवात्मिकायै नमः । १०८ ॥